No. १२४७ घ

Title न्यायसिद्धान्तमञ्जरी

Author श्रीकण्ठदीक्षित०

Extent ३० पत्राणि Age

Subject न्यायवैशेषिकम्

न्यायसिद्धांतमंजरी

१२४७

३० पन्नानि

न्याय न्यायसिद्धांतमंजरी १५:

मं॰अ॰

१

त्वे२

श्रीगणेशायनमः॥अथानुमानंनिरूप्यते।तत्रानुमितिकरणमनुमानं।अनुमितित्वंचानुमिनोमीत्य
नुभवसिद्धोजातिविशेषः।जन्यज्ञानजन्यत्वाव्यभिचारिजन्यशाब्दधीजन्यव्यभिचारिजातिमदनुभ
वत्वंवा।प्रत्यक्षत्ववारणायजन्यज्ञानजन्यत्वाव्यभिचारीति।जन्यज्ञानाजन्येनिसेनिर्विकल्पकेच
तत्वीजन्यत्वंव्यभिचरति।तत्रापिप्रथमजन्यपदेचाक्षुषत्वादिवारणाय।तद्धीश्वरज्ञानजन्यत्वा
व्यभिचारिसर्वेषांतदाश्रयाणामीश्वरधीजन्यत्वात्।उपमितित्वशाब्दत्ववारणायव्यभिचा
रीसंतं।तद्भिन्नयथोक्तज्ञानजन्यत्वव्यभिचारि।उपमितीनांसर्वासांशाब्दविषयकातिदेशवाक्या
र्थज्ञानजन्यत्वात्।शाब्दानुभवानांसर्वेषांशाब्दज्ञानजन्यत्वात्।नचशाब्दज्ञानजन्यत्वव्यभिचारि
त्वेवसम्यक्।अनुमितित्वेस्यैश्वरीयशाब्दज्ञानाजन्यत्वाभिचारित्वेनासंभवात्।नचमोक्षजन ब२
कतावच्छेदकंतत्वज्ञानवृत्तिसामान्यंजन्यज्ञानजन्यमात्रवृत्तीसतिव्याप्तिः।तस्यशाब्दविशेषवि श्रीः
षयकमननजन्यमात्रवृत्तित्वेनजन्यशाब्दज्ञानजन्यत्वाव्यभिचारित्वात्।जातिपदवामा

मानसावृत्तिजातिपरं। अत एव भक्तिश्रद्धात्वादेर्व्युदासः। अनुभवपदं स्मृतिव्यावर्तनायेति दि
क्। ननु किमिदं तत्करणमिति चेद् व्याप्तिविशिष्टपक्षधर्मताघटकलघुपदार्थज्ञानमिति लिङ्गज्ञा
न। ननु केयं व्याप्तिः। न तावत्साध्याभाववदवृत्तित्वं। पर्वतीयवह्न्यत्यन्ताभाववति धूम
स्य सत्त्वात्। नापि साध्यवदन्यावृत्तित्वं। वह्निमत्पर्वतान्यचत्वरवृत्तित्वाद् धूमस्य। अथ साध्यवत्त्वाव
च्छिन्नप्रतियोगिकान्योन्याभाववदवृत्तित्वं विवक्षितं। न च धूमवति वह्निमत्त्वसामान्यावच्छि
न्नप्रतियोगिकान्योन्याभावो वर्तते। धूमवान् वह्निमानिति प्रतीतेरिति चेन्न। केवला
का५ न्वयिसाध्याव्याप्तेः। अत्र मीमांसकाः। केवलान्वयिसाध्यकमनुमानमेव न। एतावदव्याप्त्य
वकाश इत्याहुः। तन्न। इदं प्रमेयत्वमनुमिनोमीत्यनुभवापलापापत्तेः। न च कारणबाधाद्भ्रा
न्तिरियं। व्यभिचारेण तद्बुद्धेः कारणत्वासिद्धेः। सौगतास्तु। केवलान्वयिनि साध्यवदन्यदलीक
मेवासत्ख्यातिसिद्धं। तदवृत्तित्वज्ञानादेवानुमितिरित्याहुः। तन्न। असत्ख्यातेरसिद्धेः। किंच
ज्ञेयत्वसाधके दृष्टमप्यव्याप्तिर्दुर्वारा। न ह्यलीकमज्ञेयं भवद्भिरिष्यते। अन्ये तु। कार्त्स्न्येन

संबंधो व्याप्तिरित्याहुः। तत्र वदंति। कोयं कात्स्न्येन संबंधः। कृत्स्नेन साध्येन हेतोः संबंधः॥
कृत्स्ने हेतौ साध्यसामानाधिकरण्यं वा। कृत्स्नहेतुमति साध्यवत्त्वं वा। नाद्यः। प्रसिद्धानुमा
नेऽव्याप्तेः। नहि धूमे सकलवह्निसामानाधिकरण्यमस्ति। अयःपिंडीयवह्नेः सामाना
धिकरण्याभावात्। न द्वितीयः। एकव्यक्तिहेतावव्याप्तेः। न तृतीयः। एकमात्रवृत्तिहेता
वव्याप्तेः। अत्रोच्यते। साध्यसमानाधिकरणस्य समानाधिकरणयावत्कत्वं व्याप्तिः॥
यत्समानाधिकरणा यावंतः साध्यसमानाधिकरणास्तत्त्वं व्याप्तिरिति यावत्। भवति च धू
मसमानाधिकरणा यावंतो वह्निसमानाधिकरणा इति धूमे वह्निव्याप्तिः। न तु वह्नौ धू
मस्य। नहि वह्निसमानाधिकरणा यावंतो धूमसमानाधिकरणाः। अयःपिंडत्वस्य वह्निसमा
नाधिकरणस्य धूमासमानाधिकरणत्वात्। यद्विशिष्टसमानाधिकरणा यावंतः साध्य
समाधिकरणास्तद्वत्त्वं वा। भवति च धूमत्वविशिष्टसमानाधिकरणा यावंतो वह्निसमाना
धिकरणास्तद्वत्त्वं च धूमे। न चेदृशं धूमं प्रति वह्नित्वं। नातो वह्नौ धूमव्याप्तिः। अस्ति

चेदं केवलान्वयिनि। अभिधेयत्वविशिष्टसमानाधिकरणानां यावतां मेयत्वसमानाधिकरणत्वात्॥
एवं च लाघवात् साध्यवदन्यावृत्तित्वे सति साध्यसामानाधिकरण्यं व्याप्तिः। न चेदं केवलान्व
यिन्यस्ति॥ अतो नेदमनुमानमिति मीमांसकमतमपास्तं। ततोप्यन्यल्लघुत्वात्॥ अत्र चार्वाकाः। भवतु
इयं व्याप्तिः। न चेयं शक्यग्रहा। किंचिद्धूमसमानाधिकरणं वह्निसमानाधिकरणं न वेति शंकादुर्वारत्वात्॥ न चे पा ४
दृशशंकायां व्याप्तिनिश्चयो भवितुमर्हति। तस्यास्तत्प्रतिबंधकत्वात्॥ न च भूयो दर्शनात्तन्निवृत्तिः। शतशः
७६ सहचरितयोरपि व्यभिचारोपलब्धेः। न च तर्कात्तन्निवृत्तिः। तर्कस्य व्याप्तिग्रहमूलकत्वेनानवस्था
नात्॥ इत्थं च ग्राहकाभावाद्व्याप्तेरग्रहे कुतोनुमानं स्यादिति। अत्रोच्यते॥ व्यभिचारज्ञानविरहादिक
मेव व्याप्तिग्राहकं। न च तच्छंकाविरहादुःशकः॥ क्वचित्तर्कात् क्वचित्तन्मूलभूतव्याप्त्यादौ को
टिस्मरणाद्यभावादपि तन्निवृत्तेः। न हि सर्वदा व्यभिचारशंका कोटिस्मृतिर्वास्ति अनुभूयते वेति दिक्॥
ननु सपक्षे व्याप्तिर्दृष्टांतवृत्तिधूमे गृहीता न च पक्षीयेपि तथा च कथं तदनुमितिः। पक्षवृत्तिधूमे व्या
प्तिग्रहस्यानुमितिहेतुत्वादिति चेत्॥ अत्राहुः॥ उक्ता व्याप्तिर्दृष्टांत हेतौ धूमत्वेन गृहीता पर्व वृत्ति २
ते धूमं दृष्ट्वा स्मर्यते। ततो विशेषणज्ञानरूपात्तस्मात् सतिबाधके व्याप्तिविशिष्टत्वेन पक्षधर्मधूम

ज्ञानं जायते॥ यद्वा दृष्टांते व्याप्तिज्ञानं जायमानं धूमत्वरूपसामान्यलक्षणप्रत्यासत्त्या सकलधूमगोच
रमेव जायत इत्यदोषः॥ ननु सामान्यं यदि प्रत्यासत्तिस्तदाश्चपसाक्षात्कारजननी तदा विमुद्रितनयन
स्यापि धूमत्वेन सकलधूमसाक्षात्कारः स्यादिति चेन्न॥ यत्सामान्यं प्रत्यासत्तिस्तत्प्रकारकतदाश्र
यलौकिकसाक्षात्कारजनकसामग्र्या अपि सामान्यलक्षणप्रत्यासत्तेः सहकारित्वात्॥ ननु व्याप्तिज्ञान
स्यानुमितिहेतुत्वे यत्र धूमो वह्निव्याप्य इति ज्ञानं तत्राप्यनुमितिः स्यात्॥ न च पक्षवृत्तिधूमे व्याप्तिज्ञानं कारण
त्वं चात्र नास्तीति वाच्यं॥ धूमत्वेन सामान्यलक्षणप्रत्यासत्तिमत्ते न सर्वत्रैव धूमे व्याप्तिज्ञानात्॥ न
च हेतोः पक्षधर्मताज्ञानमपि सहकारीति वाच्यं॥ धूमो वह्निव्याप्यो द्रव्यं पर्वतवृत्तीति ज्ञानादप्यनु
मित्यापत्तेः। द्रव्यत्वेन रूपेण पर्वतीयधूमज्ञानस्य सत्वात्। उच्यते॥ व्याप्यत्वप्रकारेण पक्षे हेतु
निश्चयोऽनुमितौ हेतुर्न तु व्याप्तिज्ञानमात्रं। न च धूमो वह्निव्याप्यो द्रव्यं पर्वतवृत्तीति ज्ञानं व्या
प्यत्वेन पर्वतेयधूममवगाहते येन ततोऽनुमितिः स्यात्॥ पर्वतो वह्निव्याप्यधूमवानेवेति संशया
दनुमितिर्मा भूत् इति निश्चयपदं॥ मीमांसकास्तु॥ व्याप्यतावच्छेदकप्रकारं पक्षधर्मताज्ञा

ज्ञानं व्याप्तिज्ञाने सहकारि ॥ व्याप्यतावच्छेदकं च धूमत्वं तद्रूपेण व्याप्तिग्रहात् न तु द्रव्यत्वं
नातो द्रव्यं पर्वते वह्निमदिति ज्ञानादनुमितिः ॥ एवं वह्निव्याप्यो धूमवान् पर्वत इति ज्ञानाद्या
दप्यनुमितिरित्याहुः । तन्न ॥ व्याप्यत्वप्रकारकपक्षधर्मताज्ञानत्वेन हेतुतायां लाघ
वात् । किं च एवं वह्निव्याप्यवानिति ज्ञानादनुमितिर्न स्यात् धूमत्वेन पक्षधर्मता
नवगाहनात् । तस्माद्वह्निव्याप्यवानित्येवंरूपाद्व्याप्ति [struck through] विशिष्टपक्षधर्मता
ज्ञानात्तृतीयलिंगपरामर्शत्वेन प्रसिद्धादेवानुमितिः ॥ तृतीयत्वं कथमिति चेत्
प्रथमं दृष्टान्ते धूमदर्शनं ततो व्याप्तिभानं ततस्तद्विशिष्टपक्षधर्मताज्ञानमित्ये
वंरूपेणेति गृहाण ॥ तृतीयत्वं प्रायिकमित्युक्तं ॥ न तु तेन रूपेण हेतुत्वं गौरवा
द्व्यभिचाराच्चेति ध्येयं ॥ सोयं परामर्शो नानुमितेः करणं । व्यापाराभावात् । नापि
परामृश्यमानं लिंगं परामर्शव्यापारकं । भूतभाविभ्यां लिंगाभ्यामनुमित्यजनना

मंजरी
४

अनुमितिजनकलिंगज्ञानविषयीभूतं लिंगं त्रिविधमिति सर्वः
त

पत्तेः॥ अनन्यथासिद्धनियपूर्ववर्त्तिहि कारणं॥ किं तु व्याप्तिज्ञानं। साध्यज्ञानं। लिंग
ज्ञानं वा॥ जन्यज्ञानमात्रं वा परामर्शव्यापारकं। न चातिप्रसंगः व्यापारे ऽनन्तर्निरासात्
५ ज्ञानपदं च सविषयकमात्रपरं॥ नातः स्मरणात्मकपरामर्शस्थले व्यभिचारः॥ तत्र
व्याप्तिविषयकसंस्कारस्य परामर्शव्यापारकस्य कारणत्वात्। पूर्वानुभव एव वा
तत्र कारणमिति संक्षेपः॥ तच्चानुमानं त्रिविधं॥ केवलान्वयि केवलव्यतिरेक्यन्वयव्य
तिरेकिभेदात्॥ तत्र केवलान्वयिसाध्यकमनुमानं केवलान्वयि। तत्र यो धर्मः सर्वत्र वर्त
ते स केवलान्वयी॥ यथा अभिधेयत्वज्ञेयत्वप्रमेयत्वादिः। अभिधेयत्वं च भगवदिच्छा
रूपपदशक्तिविषयत्वं तच्च सर्वत्रैव वर्त्तते। सर्वस्य भगवदिच्छाविषयत्वात्। वस्तुपद
शक्यत्वाच्च। एवं ज्ञेयत्वं ज्ञानविषयत्वं तच्च सर्वत्रैव वर्त्तते सर्वस्यैव भगव[illegible]विष ज्ञानं ३
यत्वात्। एवं प्रमेयत्वं प्रमाविषयत्वं तच्च सर्वत्रैव वर्त्तते सर्वस्यैव भगवत्प्रमाविष श्रीः
यत्वात्॥ अत्र केचित्॥ यत्र साध्यनिश्चयोऽस्ति तत्रानुमितेरनुत्पत्तेः पक्षतानुमिते ४

रंगं ॥ साध्यवत्त्वेन संदिह्यमानत्वं । नच [redacted] मेयत्वेन संशयो भवितुमर्हति । व्यतिरेककोटेर
प्रसिद्धेः । अतः कथमिदमनुमानमिति ॥ तन्न ॥ सिषाधयिषाविरहविशिष्टसाध्यनिश्चयाभावो
हि पक्षता ॥ सा चेहाप्यस्ति । नतु संशयः ॥ संशयं विनाप्यनुमितेरानुभाविकत्वात् ॥ साध्यनिश्च
येसत्यनुमित्सायां सत्यामनुमितेरुत्पत्तेस्तत्रपक्षतासंपत्तये विशिष्टान्तं । तत्र सिषाधयिषास
हितेन साध्यनिश्चयोस्ति । नतु तद्विरहसहित इति संक्षेपः ॥ असत्सपक्षः केवलव्यतिरेकी । तत्त्वं
अनिश्चितद् च पक्षातिरिक्ते साध्यसाधनसहचारकत्वं ॥ तथाहि ॥ पृथिवी इतरेभ्यो भिद्यते पृथिवी
त्वात् ॥ यन्नेतरेभ्यो भिद्यते तन्न पृथिवी यथा जलं । नचेयं तथा तस्मादितरेभ्यो भिद्यत इ
ति व्यतिरेकिणमुदाहरंति । नच पक्षातिरिक्ते जलादौ साध्यसाधनयोः साहचर्यमस्ति निश्ची
यते वा । नचानिश्चितसाध्यकत्वमेव सपक्षत्वं । घटादौ साध्यस्येतरभेदस्य प्रत्यक्षत ए
व निश्चितत्वात् । अन्यथा साध्याप्रसिद्धौ तद्घटितव्याप्तिनिरूपणानापत्तेः । नच घटे
साध्यनिश्चयेनास्य सपक्षत्वमिति वाच्यं । पृथिवीत्वावच्छेदेन साध्यनिश्चयस्यैव तदवच्छे

देनपक्षताविरोधित्वात्।नचेहसोस्ति।।सर्वज्ञपृथिव्यांतन्निश्चयाभावात्।अत्रव्यतिरेकसहचारात्
उक्ताव्याप्तिर्गृह्यतइतिप्रांचः।साध्याभावहेत्वभावयोर्व्याप्तिग्रहादनुमितिः।नचान्वयव्याप्तिग्रहाद्
कथमन्यानुमितिरतिप्रसंगादितिवाच्यं।साध्याभावव्यापकाभावप्रतियोगित्वेनपक्षधर्मतानि
श्चयःसाध्यानुमापकइत्यभ्युपगमादित्यन्ये।उभयस्मादन्वोऽन्वयव्यतिरेकीयथाप्रसिद्धानुमा
नमितिसंक्षेपः।।एवंहेतावभिहितेतदाभासानिरूप्यंते।तत्रसव्यभिचारविरुद्धसत्प्रतिपक्षितासिद्धबा
धिताहेत्वाभासाः।सव्यभिचारस्त्रिविधः।साधारणोऽसाधारणोऽनुपसंहारीच।तत्रसाधारणत्वं
साध्यवदन्यवृत्तित्वं।यथाधूमवान्वह्नेरित्यत्रधूमवदन्यस्मिंस्तप्तायःपिंडेवह्निसत्वात्।।साध्या
समानाधिकरणत्वसमानाधिकरणत्वंवा।भवतिहिधूमासमानाधिकरणंयत्धूमवदन्यत्वंत
त्समानाधिकरणोवह्निः।साध्यव्यापकीभूताभावप्रतियोगित्वमसाधारणत्वं।इदमेवसपक्षव्यावृत्त
त्वमितिगीयते।उदाहरणं।नित्यःशब्दःशब्दत्वादिति।शब्दत्वंहिनित्यत्वव्यापकोयःशब्दत्वाभावस्त
त्प्रतियोगि।नचानित्यःशब्दःशब्दत्वादित्यत्राव्याप्तिः।तस्यसद्धेतुत्वात्।एतज्ज्ञानंचानुमितौसा श्रीः
५

साक्षात्प्रतिबंधकं। व्यतिरेकि सत्प्रतिपक्षरूपत्वात्। न चैवं सत्प्रतिपक्षत्वमिति वाच्यं। हेतुभेद एव तस्यांगीका
रात्। कथमस्य व्यतिरेकि सत्प्रतिपक्षरूपत्वमिति चेदाकर्णय। शब्दत्वं हि नान्वयी हेतुः। क्वचिदपि नि
त्व३ निसेशद्दृस्यादर्शेः। किंतु व्यतिरेकी। तथा च नित्यत्वाभावव्यापकोयः शब्दत्वाभावस्तत्प्रतियोगितया
यथा साध्यं साधयेत्। तथा नित्यत्वव्यापकीभूताभावप्रतियोगितया साध्याभावमपि साधयेत्।
न च द्वयोर्विरुद्धयोरेकत्र निर्णयः। किंतु परस्परप्रतिबंधात् द्वयोरेवानिर्णय इति ध्येयं। अ
दृष्टिसाध्यहेत्वन्यतरत्वे अदृष्टिसाधकत्वं वा अनुपसंहारित्वं। यथाऽऽकाशवान् धूमात् दिश
दृष्टसादे। साध्यासमानाधिकरणत्वं विरुद्धत्वं। यथा गौरश्वत्वादिति। यद्यपि अत्रासाधारण्
त्वमेवास्ति साधारणत्वं च तथापि उपाधिभेदाद्भेदः।। पक्षे साध्यधीप्रतिबंधकः परामर्शः सत्प्र
तिपक्षः।। यथा जलमुष्णं स्पर्शवत्वादित्यादौ नेदमुष्णमतेजस्त्वादित्यादि। असिद्धिस्तु। व्यभिचाराघ
न्यपरामर्शप्रतिबंधकतावच्छेदकधर्मवत्वं। सा च त्रिविधा।। स्वरूपासिद्धिराश्रयासिद्धिर्व्याप्यत्वासि
द्धिश्चेति। पक्षे हेत्वभावः स्वरूपासिद्धिः। यथा घटः पृथिवी पटत्वादित्यत्र घटरूपपक्षे हेत्वभावः।।
पक्षे पक्षतावच्छेदकासिद्धिराश्रयासिद्धिः। गगनकमलं सुरभि कमलत्वादित्यत्र कमले पक्षे गगनी

पत्वाभावः। एतदुभयभिन्नासिद्धिर्व्याप्यत्वासिद्धिः। यथा धूलीपटले धूमनिष्ठव्याप्यभावः।
साध्याप्रसिद्धिर्हेत्वप्रसिद्धिर्वा। पक्षे साध्यशून्यत्वं बाधः। यथा जलादिपक्षे वह्न्यभावः।
न चात्र धूमस्य हेतोरसिद्धिरेवास्तीति स एव दोषोऽस्तीति कृतं बाधेनेति वाच्यं। असिद्धि
र्हि परामर्शप्रतिबंधकतया दोषः। तथा च यत्र भ्रमात्मकपरामर्शो जातः तत्र बाधे सत्य
नुमितेरनुत्पत्तेः। बाधस्यानुमितिप्रतिबंधकतया दोषत्वात्। आद्यकालावच्छिन्नो घटो
रूपवान् पृथिवीत्वादित्यत्राद्यकालावच्छेदेन घटे रूपाभावरूपबाधस्थले दोषांत
राभावाच्च। न हि पृथिवीत्वेन रूपव्याप्तिः। पक्षावृत्तितावत्त्वेति दिक्। नन्वुपाधिरपि
हेत्वाभासांतरं संभवतीति कथमत एवेति चेन्न। सव्यभिचाराद्यन्यतमत्वं हि हेत्वा
भासत्वं। न चोपाधिस्तदन्यतम इति तस्यानेवंभूतत्वात्। अत एव सिद्धसाधनम
पि न हेत्वाभासांतरं। ननु कोऽयमुपाधिः। तत्राचार्याः। साध्यव्यापकत्वे सति

साधनाव्यापक उपाधिः। तद्व्यापकत्वं च तत्समानाधिकरणा यावंतो यत्समानाधिकर
णास्तत्वं। यथा धूमवान्वह्नेरित्यत्रार्द्रेंधनं। भवति हि न तत्साध्यव्यापकं [redacted]। धूमसमा
नाधिकरणस्य यावतस्तत्समानाधिकरणत्वात्। भवति च साधनाव्यापकं। वह्नि
मदयःपिंडे तदसत्वात्। सद्धेतौ तु नैवं। तत्र हेतोः साध्यव्याप्यत्वात्। साध्यव्याप्यव्या
पकस्य सुतरां साध्याव्यापकत्वात्। अत्र वदंति। साधनावच्छिन्नसाध्यव्यापकः व्या
[redacted]त्तं। यथा काकः श्यामो मित्रातनयत्वात् इत्यत्र शाकपाकजत्वं। न हि तत् श्याम
त्वव्यापकं। श्यामत्ववति घटे सत्वात्। किंतु मित्रातनयत्वावच्छिन्नश्यामत्वव्या
पकं। यत्र यत्र मित्रातनयत्वावच्छिन्नश्यामत्वं तत्र तत्र शाकपाकजत्वसत्वा[redacted]
त्॥ अथ [redacted] साधनावच्छिन्नसाध्यव्यापकत्वे सति साधनाव्यापकत्वमुपाधित्वं विवक्षितमि
ति चेन्न। वायुः प्रत्यक्षः प्रमेयत्वादित्यादौ पक्षधर्मवहिर्द्रव्यत्वावच्छिन्नसाध्यव्यापके उद्भूतरू

मे. पववत्त्वादावुपाधावव्याप्तेः। नहि प्रमेयत्वरूपसाधनावच्छिन्नसाध्यव्यापकं तत्। आत्मा
७ दावसत्वात्। [redacted] किंतु बहिर्द्रव्यत्वावच्छिन्नप्रत्यक्षत्वव्यापकं। यावतितद्वृत्तिघटादौरूप
सत्वात्। अथ पक्षधर्मावच्छिन्नसाध्यव्यापकत्वे सति साधनाव्यापकत्वं विवक्षितमि
ति चेन्न। यथोक्तस्थले शाकपाकजत्वेऽव्याप्तेः। नहि तत्पक्षधर्मावच्छिन्नश्यामत्वव्
यापकं। तथाविधश्यामत्ववति पक्षेऽसत्वात्। अथ किंचिद्धर्मावच्छिन्नसाध्यव्यापकत्वं विवक्षितं यत् ५
स च धर्मः क्वचित्पक्षधर्मः इति चेन्न। पर्वते वह्निमान्धूमादित्यत्र महानसत्वाभावस्योपाधिताप
यत् ५ त्तेः। भवति हि महानसान्यत्वरूपं किंचिद्धर्मावच्छिन्नवह्निव्यापको महानसत्वाभावः पावत्तांशे दे वह्नि
मति सत्वात्। न च धूमव्यापकोऽसत्वात्। अत्रोच्यते। स्वानधिकरणसाधनाधिकरणवृत्तिधर्माव
क्व च्छिन्नसाध्यव्यापकत्वावच्छेदकधर्मवत्वमुपाधित्वं। यद्धर्मावच्छिन्नानधिकरणसाधनाधिक
रणवृत्तिधर्मावच्छिन्नसाध्यव्यापकत्वावच्छेदकधर्मवत्वं तत्। तच्च स्वावच्छिन्नानधिकरणहेतु
मन्निष्ठयत्किंचिद्धर्मावच्छिन्नसाध्याधिकरणवृत्तियो यावंतो यद्धर्मावच्छिन्नसमानाधिकर श्री:

णास्तद्वत्त्वं। भवति हि आर्द्रेन्धनत्वावच्छिन्नानधिकरणवह्निमदयःपिण्डनिष्ठद्रव्यत्वावच्छिन्नध
र्माधिकरणं यत्तन्निष्ठा यावन्तो धर्मा आर्द्रेन्धनत्वावच्छिन्नसमानाधिकरणा अत आर्द्रेन्धनमु
पाधिः। एवं रूपत्वावच्छिन्नानधिकरणप्रत्यक्षस्पर्शाश्रयत्ववन्निष्ठ। वहिर्द्रव्यत्वावच्छिन्नक्षे
त्वाधिकरणं यत् तन्निष्ठा यावन्तो धर्मा रूपत्वावच्छिन्नसमानाधिकरणा अतो रूपमुपा
धिः। एवं शाकपाकजत्वत्वावच्छिन्नानधिकरणं यन्मित्रातनयत्ववत्तन्निष्ठमित्रातनयत्वा
वच्छिन्नश्यामत्वाधिकरणं यत्तन्निष्ठा यावन्तो धर्माः शाकपाकजत्वत्वावच्छिन्नसमाना
धिकरणा अतः शाकपाकजत्वमुपाधिः। न चैवं सद्धेतौ सं भवति। न हि महानसत्वाभाववान
धिकरणं यद्धेत्वधिकरणं महानसं तन्निष्ठधर्मावच्छिन्नवह्न्यधिकरणमहानसादि तन्नि
ष्ठा यावन्तो धर्मा महानसत्वाभावत्वावच्छिन्नसमानाधिकरणाः। महानसत्वस्यैवाभावात्।
अत एव सद्धेतौ पक्षेतरत्वं नोपाधिः। पक्षमात्रेष्टत्वधर्मेण तत्सामानाधिकरण्याभावादिति सं

मं० क्षेपः। तच्चानुमानं परार्थं न्यायपूर्वकं। न्यायश्चानुक्रमिकप्रतिज्ञादिपंचैकसमुदायः। यथा प
८ र्वतो वह्निमान्धूमात्। यो यो धूमवान् सो सोग्निमान्। वह्निव्याप्यधूमवानयं। तस्माद्वह्निमानि
४ ति। तत्रैवैतन्न्यायघटकपर्वतो वह्निमानिति शब्दवृत्ति अवयवविभाजकोपाधिमत्वं प्रतिज्ञात्वं
एतद्धूमादिति शब्दवृत्तिता दृशोपाधिमत्वं हेतुत्वं। एतद्यो यो धूमवान् सो सोग्निमानिति
शब्दवृत्तिता दृशोपाधिमत्वमुदाहरणत्वं। एतद्वह्निव्याप्यधूमवानयमिति शब्दवृत्तिताद्
शोपाधिमत्वमुपनयत्वं। एतत्तस्माद्वह्निमानिति शब्दवृत्तिता दृशोपाधिमत्वं निगमनत्वं।
च२ अवयवत्वं प्रतिज्ञाद्यन्यतमत्वं। उक्तं च। अवयवाः प्रतिज्ञादिभेदादिति॥ इति महाचार्यचूडाम
णिकृता न्यायसिद्धान्तमंजर्यामनुमानपरिच्छेदः समाप्तः॥ श्रीरस्तु। श्री ८

श्रीः॥ अथ शब्दो निरूप्यते। शाब्दप्रमितिकरणं शब्दः। शाब्दत्वं प्रत्येमीत्यनुभवसिद्धो जातिविशेषः।
जन्यपदधीजन्यत्वव्यभिचारि अनुभवत्वाव्यापकजातिशून्यत्वे सति पदविषयकत्वाव्य
भिचारिजातिशून्यधीत्वं वा। सत्यंतं प्रत्यक्षानुमितिस्मृतीनां व्यावर्त्तनाय। तत्र तादृशीनां
प्रत्यक्षत्वादीनां जातीनां सत्वात्। जातिशून्यत्वं अनुभवत्वाव्यापकजातिशून्यत्वं चासं
भवि। अनुभवत्वादीनां तद्व्यापकशाब्दत्वस्य च सत्वात्। जन्यपद‸धीजन्यत्वव्यभिचा
रिजातिशून्यत्वं। नपि तथा। तादृगनुभवत्वादीनां सत्वात्। पदधीजन्यत्वव्यभिचारि
त्वान्तापदधीजन्यत्वव्यभिचारित्वात्। पदधीजन्यत्वव्यभिचारि अनुभवत्वापरजा
तिशून्यत्वं चानुमितावपि। अनुमितित्वस्य भगवत्पदधीजन्यत्वाव्यभिचारित्वात्।
अतः समुदितमुपात्तं। उपमितावतिव्याप्तिवारणाय शून्यांतं। ज्ञानावतिव्याप्तिवार
णाय धीपदं। सोऽयं शब्दः सकलजनानुभवसिद्धो दुरपह्नवः। तज्ज्ञानकत्वमपि तथा।
आगोपालांगनमाचपंडितं चैत्रवाक्यादमुमर्थं प्रत्येमीति प्रतीतेः। केवलमनु

मं॰जर॰ऋ॰ मानविषया अन्यथा वेति विप्रतिपद्यंते। अत्रानुमानविधयेति वैशेषिकादयः। नैया
यिकास्तु पृथगेव शाब्दो मानं। न त्वनुमानं ~~विषयक~~। शब्दस्यार्थव्याप्यत्वात्। न हि यत्र
शब्दस्तत्र घटानयनादिरूपोर्थः शब्दस्याकाशवृत्तित्वात् घटादेश्च तदवृत्तित्वात्। दृ
श्यते च व्याप्तिबुद्धिविधुरलोकेऽपि शब्दादन्वयानुभवः। न चायमनुमितिरूपः तस्याः व्या
प्तिधीजन्यत्वात्। प्रतियंति च लोका अननुमितमसाक्षात्कृतं श्रुतमिदं नैयायिकेभ्य इ
त्यलमतिविस्तरेण। ननु यदि स्वातंत्र्येणैव शब्दो मानं तदा घटमानयेत्यतः पामराणामपि
पदार्थप्रत्ययः स्यादिति चेन्न। शक्तिग्रहस्यापि सहकारित्वात्। पामराणां च घटादिशब्दे
शक्तेरग्रहा[redacted]त्। अथ केयं शक्तिः। अभिधानामपदार्थांतरं संकेतग्राह्यमिति मीमां
सकाः। नैयायिकास्तु। आवश्यकत्वात् संकेत एवाभिधा। न तु पदार्थांतरं। मानाभावा
त्। स च संकेतोऽस्माच्छब्दादयमर्थो बोद्धव्य इत्याकारक इच्छा। हंत नैवं पामरादिसंकेतिता श्रीः
अपि शब्दा अभिधायकाः स्युरिति चेन्न। न हि संकेतमात्रमभिधा किं त्वीश्वरसंके ॥२॥

तः। न चाप्रभाषिते सोऽस्ति मानाभावात्। कथं तर्हि ततोऽन्वयबोध इति चेत्। श
क्तिभ्रमादिति गृहाण। कथं तर्हि पामराणामीश्वरमविदुषां मीमांसकानां चा
र्थप्रत्ययः शब्दादिति चेत्। उच्यते। न तावदीश्वरसंकेतत्वेन तद्बुद्धेः कारणं किंतु
संकेतत्वेन। अस्ति च तेषामपि तथा ज्ञानं। आधुनिकसंकेतितानां चैत्रादिश
ब्दानां का गतिरिति चेत्। श्रुद्धदशेऽहनि पिता नाम कुर्यादिति सामान्यतस्तस्यापी
श्वरसंकेतत्वमिति गृहाण। स्यादेतत्। सोऽयं संकेतः कथं ग्राह्यः। उपमानादिति
चेन्न। तस्य वाक्यार्थज्ञानमूलकत्वात्। तस्य च शक्तिग्रहमूलकत्वात्। उच्य
ते। प्रथमतः शक्तिग्रहो व्यवहारात्। तथाहि। घटमानयेति केनचिदुक्तः कश्चन न ४
तदर्थप्रतीत्य घटमानयति तच्चोपलभमानो बालस्तस्याक्रियया तस्य प्रयत्न
मनुमिनोति तेन च घटानयनगोचरप्रयत्नेन तस्य ज्ञानमनुमिनोति। स्वप्रय इतिसाध्यत्वज्ञानं।
त्नेन तथा निश्चयात्। ततस्तद्धेत्वाकांक्षायामुपस्थितत्वाच्छब्दमेव कल्पयति

मंजरी
२
१०

तदनंतरंच घटादिपदानां प्रत्येकमावापोद्वापाभ्यां घटपदं घटधीजनकमिति
कल्पयति। रूपे च तस्मिन्नेति प्रसंगभंगाय तज्ज्ञानानुकूलसंकेतरूपसंबंधं क
ल्पयतीति किमनुपपन्नं। तदनंतरं च क्वचिद्व्यवहारात्। क्वचिदुपमानात्।
क्वचिच्छब्दात् व्याकरणकोशादेरिति संक्षेपः। स्यादेतत्। वृद्धयोर्व्यवहारं प
श्यता संकेतो ग्राह्यः। द्वयोरेव कथं संकेतग्रहः। अन्ययोर्व्यवहारादिति चेन्न। अनवस्था
पत्तेः। अनादित्वादियमिष्टैवेति चेन्न। [redacted] सर्गादौ तदभावा सं
त्। प्रलये मानाभावात्सर्गादिरेवासिद्ध इति चेन्न। कार्यद्रव्यानधिकरणकार्या
ल४ धिकरणकालस्य खंडप्रलयतया प्रसिद्धस्यागमसिद्धत्वात्। उच्यते। सर्गादौ भ
गवानीश्वरः शरीरद्वयं परिगृह्य तथा व्यवहरति ततस्तद्व्यवहाराद्बालः पूर्वव
त्संकेतं गृह्णातीति किमनुपपन्नं। ईश्वर एव किं मानमिति चेत्। सर्गादौ व्यवहारा श्रीः
न्यथानुपपत्तिरेव। ननु पूर्वसर्गसिद्धसर्वज्ञत्वकामन्वादय एव व्यवहारहेत १०

वःसंत्यि तिचेन्न। तेषां सर्वज्ञत्वे मानाभावात्। व्यवहारान्यथानुपपत्तिरेव मानमितिचेत् न।
पूर्वसर्गव्यवहारस्येवमप्यनुपपत्तेः। तत्राप्यन्यः कल्प्यतामितिचेत् न। प्रतिसर्गभूयसां
तथाभावकल्पनायां गौरवात्। अस्त्येक एव सर्वत्र मूलमितिचेत् स एवास्माकमीश्वर
इति दिक्। स्यादेतत्। यदि शक्तिग्रहः सहकारी तदा घटशब्दात् घटप्रत्ययः किं न स्यात्
अस्ति च तस्य शक्तिग्रहो घटे। अथ यः शब्दो यत्र गृहीतशक्तिकः स तदर्थं बोधयतीति चेत्
तर्हि काश्यां गौरस्तीति वाक्यात् देशान्तरस्थस्य गोः प्रत्ययो न स्यात्। नहि तस्य काशीस्था
यां गवि शक्तिग्रहोऽस्ति। तस्या एवा प्रतीतेः। अत्र मीमांसकाः। गवादिपदानां गोत्व ए
व शक्तिः। कथं तर्हि व्यक्तिलाभ इति चेदाक्षेपादित्याहुः॥ ननु कोयमाक्षेपः अ तस्य ४
र्थापत्तिरेवाक्षेपः॥ गोत्वं हि स्वाश्रयं विनानुपपन्नं तमाक्षिपतीति भट्टाः। तन्न॥ अनुपपत्तिज्ञानमंत
रेणापि गौरस्तीति गोत्वविशिष्टव्यक्तिप्रतीतेः। तस्मात् समानवित्तिवेद्यमाक्षेप इति गुरवः। यावती
हि धीर्व्यक्तिं विषयीकरोतीति व्यक्तेर्लाभः। इदमेव कथमिति चेत् जातिभासकसामग्र्या एत
द्वै१

जाति१ २२

मं०
२१
॥

बोधकत्वादिति गृहाण। यद्वा। जातिशक्तिरेव व्यक्तिं बोधयति। न चान्यशक्तत्वयान्यबोधनेऽतिप्रसं
गः। गोत्वशक्तं पदं गोत्वविशिष्टं बोधयतीत्यनतिप्रसंगादन्यथानुपपत्त्या तथैव कल्पनादिति। तद
परे न क्षमंते। तथा सति गोत्वमस्तीत्यतोऽपि गोत्वविशिष्टप्रसक्त्यापत्तेः। न च गोपदस्य गोत्वइव गोत्व
पदस्य गोत्वत्वे शक्तिः। तथा च गोत्वपदात् गोत्वत्वविशिष्टस्यैव बोधो न तु गोत्वविशिष्टस्येति
वाच्यं॥ व्यभिचारादानंत्याच्च गोपदस्य गोत्वे शक्तिः गोत्वपदस्य तु न तथा॥ गोत्वस्यैकत्वाद्व्यभिचाराच्च। तस्मा त्व५
त् गोत्वविशिष्ट एव शक्तिः। न चोक्तदोषः। गोत्वसामान्यलक्षणया सकलगोरूपस्थितौ सर्वत्रैव गवि शक्ति
ग्रहसंभवात्। अस्तु वा एकत्रैव गवि शक्तिग्रहः। न चान्यगविबोधानापत्तिः। अन्यशक्तिग्रहादन्यबोधने
तिप्रसंगादिति वाच्यं॥ गोत्वविशिष्टशक्तिग्रहो गोत्वविशिष्टप्रत्यायक इत्येवमनतिप्रसंगादिति संप्र
दायः। गव्येव शक्तिर्न तु गोत्वेऽपि गौरवात्। न चैवं गोत्वबोधानापत्तिः। गोत्वावच्छेदेन शक्तिग्रहस्य गोत्ववि
शिष्टप्रत्यायकत्वादिति तत्त्वं॥ स्यादेतत्। गोत्वविशिष्टशक्तिस्तदा गोः शुक्लद[illegible]त्यतो गोशुक्लयोरभेद
प्रसक्तयो न स्यात्। तस्यान्वयरूपस्याशक्यत्वात्। न च शाब्दशक्यमपि भासते अतिप्रसंगात्। उच्यते।
गोशक्तं पदमेव गवान्वयं बोधयति। न चाशक्यबोधने घटमपि बोधयेदिति वाच्यं। गोशक्तं हि पदं ग श्रीः
१२

श्रुतत्वाच्च भेदेन शक्तिं कल्पयति। तदनु चावापोद्वापाभ्यां घटादिपदे शक्तिं गृह्णन् प्रथमकल्पनानुरोधात् कार्यान्विते

वाच्यबोधकं। न च घटयोगवाच्यत्वे येनातिप्रसंगः स्यात्। प्रभास्तु। अन्वयविशिष्टशक्तिग्र
हादन्वयेपि शक्तिरेव स्यात्। कुः। तन्न। अन्वयस्यानन्यलभ्यत्वात्। अनन्यलभ्यस्य च शब्दार्थत्वा
त्। अन्यथा लक्षणलोपापत्तेः। प्राभाकरास्तु। कार्यान्वितपदानां शक्तिः। तथा हि। प्रयोजकवा
क्यश्रवणानंतरं प्रयोज्यस्य प्रवृत्तिमुपलभमानो बालस्तत्प्रयोजक तत्प्रकार्यता विशिष्टज्ञानमनुमिनो
तीति। स्वप्रवृत्तौ तेन कार्यत्व विशिष्टज्ञानस्य हेतुत्वावधारणात्। अतस्तदेव वाक्यप्रयोज्यमुपस्थितत्वात्
शब्दमेव तथावधारयति। ततस्तन्निर्वाहिकां कार्यान्विते घटादौ शक्तिं कल्पयति। न तु केवलघटा
दौ। ओपद्युत्पत्तिविरोधात्। इत्थं च यत्र कार्यतावाचकपदसमभिव्याहारो नास्ति तद्वाक्यमर्थवादरू
पं सकमेवाक्षसंसर्गाग्रहात्। न तु सर्वेषां पदानां कार्यान्वितवाचकत्वात्तद्वाचकपदसमभिव्याहारे
नास्तीप्रसंगत। अप्रसंगतं चार्थवादस्याप्रामाण्यमिति चेत्। अश्रोच्यते। द्विविधा हि पदशक्तिः। अनु
भाविका स्मारिका च। तत्रानुभाविका कार्यान्विते। स्मारिका च जातौ। तथा च घटादिपदे घटादिपदात्कार्य
त्वस्यानुपस्थितौ कथं तदन्वितबोधं जनयेत्। कार्यतान्वयबोधे तदुपस्थितेरपि हेतुत्वादिति नार्थवा

व्यवहारस्तु ४

मं.०१
१२

दस्य प्रामाण्यमिसूत्तुः। तन्न। आवापोद्वापाभ्यां लाघवात् घटादिमात्रे एव शक्तिग्रहः। न तु कार्यत्वान्वये
पि। अन्यलभ्यत्वात्। प्रथममनन्यलभ्यत्वं बालस्य नोपस्थितमिति चेत्। प्रथमं तर्हि कार्यत्वान्वये शक्तिग्रहो क्ति२
स्तु। यदा च तदनुपस्थितं तदा घटमात्रे शक्तिग्रहोस्तु सा बाध्यतां गौरवात्। अथ चरमप्रवृत्तालाघवमा
त्र शक्तिकल्पनाकथं प्रथमप्रवृत्तां बलवतीं कार्यान्वितशक्तिकल्पनां बाधितुमिष्टेत्ति चेन्न। प्र
थमकल्पनाया बलवत्त्वासिद्धेः। न हि प्रथमप्रवृत्तमेव बलवदिति [redacted]। चंद्रतारादिस्वल्पेतोकल्प
नायाः प्रथमप्रवृत्तीनायाः शास्त्रजन्यमहत्त्वप्रतीत्या बाधानापत्तेः। चरमकल्पनाया लाघ
वे सहायतया बलवत्त्वाच्च। किं चैवं कार्याद्यन्वितानुभवसिद्धौ च यथानुभवो न स्यात्। न चासंसर्गाग्र
हमात्रं तत्र न तु संसर्गानुभव इति वाच्यं। घटमानयेत्यत्रापि तदापत्तेः। तथा च गतं शब्दप्रामाण्य
प्रत्याशयापि। किं चैवमर्थवादरूपाणां श्रुतिस्मृतीतिहासपुराणादीनामप्रामाण्यं
स्यात्। तथा च स्तुष्टपहसितं मिश्रैः प्रसिद्ध एव लोके स्मिन्गुरुर्बंधुः प्रभाकर इति। तस्मा श्री
देवं वदन्प्रतारकः कश्चिद् दुर्लभ्यस्यास्मल्लिपिसाहाय्यात्प्रभाकर इति गृहीतो लोके। १२

रिति प्रत्युक्तमुत्पश्यामः। ननु पदशक्तिग्रहः सहकारी तदा गंगापदात्तीरबोधो न स्यादिति चेन्न। शक्ति
ग्रहेन तत्वेन प्रयोजिका किंतु दृष्टत्वेन। अस्ति च गंगापदस्यापि तीरे दृष्टिर्लक्षणयैव। अथ केयं लक्षणा नाम
शक्याद् शक्योपस्थितिर्लक्षणेत्येके। तन्न। उपस्थितिहेतुर्हि दृष्टिः न तु सैव। अशक्ये तात्पर्यं लक्षणेत्यन्ये।
तन्न। अन्वयेऽपि तात्पर्यस्य लक्षणत्वापत्तेः। किंच तात्पर्यनिर्वाहिका हि दृष्टिर्न तु तदात्मिकैव। श
क्तेरपि तत्त्वापत्तेः। उच्यते। स्वशक्यसंबंधो लक्षणा। अस्ति च गंगापदशक्यः प्रवाहविशेषस्तत्सं
बंधस्तीर इति। सा च लक्षणा द्विविधा। गौणी मुख्या च। तत्र सादृश्यात्मकः शक्यसंबंधो गौणी। य
था गौर्वाहीक इति। तदन्या मुख्या। यथा आयुर्घृतमिति। ननु यद्येवं वृत्तीकर्षे तर्हि राजपुरुष इत्या
दौ षष्ठ्यर्थभानः। न हि राजपदं संबंधे शक्तं। अथ संबंधोऽन्वयविधया भासते नीलो घट इत्यत्राभेद
इवेति चेन्न। राजा पुरुष इत्यत्रापि तदापत्तेः। अथ नामार्थयोरभेदेनैवान्वयो न त्वन्यथा तथैव व्यु
त्पत्तेः। राज्ञः पुरुष इत्यत्र तु न नामार्थयोरन्वयः किंतु विभक्त्यर्थनामार्थयोरिति चेत् तर्हि राज

13

तथापि१

पुरुष इत्यत्र कर्पतयोस्तथान्वय इति स्वयमेव विभावय। अथ संबंधे लक्षणेति चेन्न। राजपुरुषसंबंधः पुरुष
इति वदन्वयः स्यादिति तद्दोषतादवस्थ्यात्। अथ राजपुरुषात्मकसमुदाय एव राजसंबंधिपुरुषलक्षणे
ति चेन्न। शक्तिविरहे लक्षणाया अयोगात्। शक्यसंबंधो हि लक्षणेत्युक्तं। उच्यते। राजपदं राजसंबंधिल
क्षकं। तथा चाभेदेनैव पदार्थद्वयान्वयः। न चैवं कर्मधारयत्वापत्तिः। समासपूर्वदशायां पदयोस्तु
ल्यार्थत्वाभावात्। अन्ये तु लुप्तषष्ठ्यैवान्वयं बोधयति। षष्ठीलोपमजानतस्तु तत्रान्वयप्रत्ययः श
क्तिभ्रमात्। राजपदलक्षणयैवेति स्वीचक्रुः। वैयाकरणास्तु। समासवाक्यस्य विशिष्टार्थे शक्ति समासस्थले
रेव। न चैवं राजपदे शक्तिमविदुषोपि राजपुरुषादिपदान्वयप्रत्ययः स्यादिति वाच्यं। समस्तशक्ति ८५
ग्रहोप्यनुशासनात्। न चावयवशक्त्यग्रहेनुशासनग्रहः संभवतीति तच्छक्तिग्रहस्य समुदाय
हे२ यहेतुत्वादित्याहुः। तन्न। अवयवलक्षणयैवोपपत्तौ शक्तौ मानाभावात्। तदुक्तं। जहत्स्वार्था तु
तत्रैव रूढिर्यत्र विरोधिनी तस्मादन्यथोपपत्तौ समासे शक्तिरयुक्तैवेति संक्षेपः। स्यादेतत्। श्री:
मास्तु तत्पुरुषे शक्तिः बहुव्रीहौ तु चित्रगुपदे चित्रगोस्वामिनि शक्तिरावश्यकी न हि तत्र ल ९३

क्षणया निर्वाहः। न घास्ति। किं गोपदं गोस्वामिलक्षकं चित्रपदं वा चित्रस्वामिलक्षकं। नाद्यः। न हि चि
त्रस्यार्थस्य गवान्वयः संभवति तस्य पदार्थैकदेशत्वात्। अत एव नांशोपि गवानन्वयापत्तेः। अपि गो
पदं चित्रगोस्वामिलक्षकं चित्रपदं तात्पर्यग्राहकमिति चेन्न। चित्रपदं चित्रगोस्वामिलक्षकं गोपदं
तात्पर्यग्राहकमिति विनिगंतुमशक्यत्वात्। तस्माद्धि निगमकाभावात्समुदाये शक्तिरेवेति के
चित्। अत्रोच्यते। विनिगमकाभावादस्तु वा पदद्वयलक्षणा न तु समुदाये शक्तिरन्यलभ्यत्वात्।
मीमांसकास्तु। समुदाये एव लक्षणा। न च समुदायस्य शक्तेरभावाल्लक्षणानुपपत्तिः। स्वबोध्यसंबं
धो हि लक्षणा। अस्ति चात्र वाक्यस्यापि विशिष्टं बोध्यं। अन्यथा का गतिर्गभीरायां नद्यां घोष इत्या
दौ। न हि नदीपदं तीरलक्षकं। गभीराया नित्यमन्वयापत्तेः। न हि तीरं गभीरं। नापि गभीरपदं तीरलक्ष
कं। न घोषस्यान्वयापत्तेः। न हि तीरं नदी। तस्मादनन्यगतिकतया वाक्यमेव गभीरनदीतीरल
क्षकमित्याहुः। अत्रोच्यते। वाक्यं न विशिष्टार्थबोधकं। न ह्यबोधकतावच्छेदकशक्तेरभावात्।

प्र.

१४ अतस्तत्रस्वबोध्यसंबंधो लक्षणेति रिक्तं वचः। किंच गभीरायां नद्यामिति विभक्त्यंतभागस्य नदीतीरे लक्षणा त न१
दाधारतापत्तस्तया नापत्तेः। नापि गभीरायां नदीति भागस्य तस्याबोधकत्वात्। बोधकत्वे वा लक्ष्ये विभक्त्यर्था
14 नन्वयापत्तेः। प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वात्। न हि स भागः प्रकृतिर्येन तदर्थे विभक्त्यर्थान्वयः स्या
त्। गभीरायामिति सप्तम्यनापत्तेश्च। अथ विभक्त्यंतस्यैव गभीरनदीतीराधारत्वलक्षकत्वमिति चे
न्न। अशक्तत्वात्। तस्मात्पदद्वय एव विनिगमकाभावाद्विशिष्टनदीतीरे लक्षणा। न चैकपदवैयर्थ्यं
परस्परतात्पर्यग्राहकत्वादिति संप्रदायविदः। अंत्यपद एव लक्षणा विभक्त्यर्थान्वयानुरोधादि
ति [redacted] नव्याः। विस्तरस्त्वस्माकं मणिमरीचिनिबंधतात्पर्यदीपिकयोरनुसंधेयः। उपकुं
भं अर्धपिप्पलीत्यादावपि उत्तरपदलक्षणयैवोपपत्तौ न शक्तिरुपेयते। अन्यलभ्यत्वात्। समाहार
द्वंद्वे पाणिपादमित्यादौ पाणिपादं पाणिप्रतियोगिकं पादपदं तु पादप्रतियोगिकसमाहारं लक्ष
यति न पाणिपादसमाहारे शक्तिः। समाहारश्च तुल्यवदेकक्रियान्वयित्वरूपं साहित्यं। सेनाव[redacted] श्रीः

१४

नादिवदपेक्षाबुद्धिविशेषविषयत्वं वा नन्वेवं पाणिपादं वादयेत्यत्रान्वयः समाहारे वा न कर्मत्वाभा
वादिति चेन्नापरं परयातत्र कर्मत्वान्वयादिसेको समाहारोत्तरविभक्त्यर्थकर्मत्वादेः समाक्रियमाणत एवा
न्वयः। पदस्तुत्पत्तिवैचित्र्यादिसत्त्वे पाणिपादं वादयेत्यत्र पाणिपादमात्रप्रतीतिर्न समाहारे लक्षणा शक्ति हा३
र्वा। नन्वेवं द्विवचनापत्तिरसाधुत्वात् समाहारसंज्ञा तु नदीदध्यादिवत्पारिभाषिक्येव। इतरेतरद्वंद्वे तु ध
वखदिरावितिस्वरूपद्वयप्रतीतिर्न लक्षणाशक्तिर्वा। मीमांसकास्तु। अत्रापि धवखदिरसाहित्ये
लक्षणा। तदाहुः। साहित्ये द्विवचनबहुवचने द्वंद्वसमासो वेति। साहित्यं च तुल्यवदेकक्रियान्वयि
त्वं। अत एव यत्कार्यं तदनयाः सहेत्यत्र पत्न्याः सहभावमात्रं न तु साहित्यं प्रयोगादौ पत्न्या अ
नुमतिद्वारकान्वयेन तुल्यवदेकान्वयादित्याहुः। नीलोत्पलमित्यादौ नीलाभेदस्यान्वयविधिबोधे वा नोपपत्तेः। कर्म
धारयेन शक्तिर्वा लक्षणा। अत एव तत्पुरुषात्कर्मधारयो लघीयान्। तत्र हि पूर्वपदे संबंधे लक्षणेत्युक्तं। नञ् धि३
तत्पुरुषे घटः पट इत्यत्र घटपदं घटसंबंधिपरं नञ्पदं चान्योन्याभावे शक्तमेव॥ संसर्गाभाववाचकं न
ञ्पदं नान्योन्याभावे शक्तमिति चेन्न॥ लाघवेन विनिगमनाविरहेण चाभावे एव तत्तस्य त्वावधार

मात्रे०

प्र०

१४ णात्। ननु घटः पट इत्य[illegible]तिवदभाववद्घटयोरन्वयोपपत्तेर्न घटपदेऽपि लक्षणा युक्तेति चेन्न। नामा
पर र्थयोर्भेदान्वयस्याव्युत्पत्तेः। कथं तर्हि न घटः पट इत्यत्रान्वय इति चेत्। घटपदस्य घटप्रतियोगिके लक्ष
15 णेति गृहाण। प्रथमायां वा षष्ठ्यर्थे लक्षणा। ननु नञ्सुविभक्तौ लक्षणेति चेत्। तर्हि कथं षष्ठीतः कर्मतात्प
या र्यः। कथमेकस्यां दारा इति बहुवचनं। आनुशासनिकीयमिष्टेवेति चेन्न। प्रकृतेऽपि तुल्यं। तदिदमा
हुः। नियतप्रयोगा हि केचिदव्ययाः इति। तथापि नञर्थपटयोः कथमाश्रयाश्रयिभावान्वयः। न
लुप्तष ञ्नरश्रीसरलादितिचेन्न। षष्ठीलोपमजानतोऽपि तल्लोपप्रत्ययात्। नञ्पदमभाववद्बोधक
मितिचेन्न। घटस्याभावेऽनन्वयापत्तेः। तस्य पदार्थैकदेशत्वात्। भेदं। ससंबंधिकस्थले एकदेशे
ऽप्यन्वयस्वीकारात्। यथा चैत्रस्य पितृत्वादौ चैत्रस्य जनकत्वेऽन्वयः। अन्ये तु समुदाय एव इतरप
दार्थान्वयः परंपरासंबंधेन इत्याहुः। युक्तं चाभाववत्त्वलक्षकत्वमेव। अन्यथा घटपटमित्यत्रे समा
नविभक्तिकत्वानुपपत्तेः। परे तु निपातस्थले अन्वये व्युत्पत्तिरिति। घटतदभावयोः प्रतियोग्यनुयो श्रीः
गिभावेनान्वयोपपत्तौ न घटादिपदे लक्षणा। अत एव चन्द्र इव मुखमित्यादौ चन्द्र इवार्थे १४

न्य२

योर्भेदनान्वयः। अत एव घटो नास्ती सत्रापि घटतदभावयोरन्वयो निष्फलं क इत्याहुः। तन्न। मानाभावात्।
घं द इइवं मुखमित्यादौ तु घं इपदं तत्साहश्यवल्लक्षकं इवपदं तात्पर्यग्राहकं। अत एव चंद्रमिव मुखं पश्या
मीत्यत्र द्वितीया। अन्यथा तदनुपपत्तेः। अनुवा षष्ठ्यर्थ एव [redacted] विभक्तेर्लक्षणा। अनुशासनानुग्रहात्। घ
टो नास्तीत्यत्रापि तथैव दोषः। अन्ये तु। घटो नास्तीत्यत्र घटस्याभावोस्तीति नार्थः। तथा सति भूतले घटो
स्तं ५ नास्तीत्यस्याप्यापत्तेः। अभावस्यैकत्वात्। किंतु भूतलं समभाव प्रतियोगी [redacted] घटोस्तीति। तन्न। ष्केसाधिक
रणाकांक्षापत्तेः। कथं तर्हि [redacted] घटो न सत् इत्यादीति चेत्। भावनान्वेप्यभाव प्रतियोगि निसंख्या [redacted] न्वया
त्। कथमिति चेत्। तथैव प्रतीतेरिति गृहाण। परे तु। इह भूतले नास्ति त्वरूपआख्यातार्थ निषेधए
वघटे प्रतीयते। न पचति चैत्र इत्यत्रेव। नातो द्विवचनानुपपत्तिः। नन्वेवं जातौ सत्ता नास्तीत्यत्र का गतिः। जा नु ४
तिहन्तित्याभावस्य सत्तायामसत्वात्। जाति समवेतत्वस्य चाप्रसिध्या निषेद्धुमशक्यत्वादिति चे
त्। या गतिः सत्तानजातिहन्ति रितिवाक्यस्य। अयोग्यमेवेदं कवाक्यं इति पदं कोसाक्षात्संबंधावच्छि
न्न इति पर मिति उच्यो। तथापि न नञर्थो निषेधो घटे कथमन्वेतीति चेन्नो निपातातिरिक्त नामार्थ

पं
१६
16

स्यादिनामार्थेऽभेदेनान्वयो नञ्नामार्थमात्रस्येति प्रतियंति। स्यादेतत् घटो नायमित्यादौ भेदत्वं प्रतीयते।
भूतले न घट इत्यत्रासंताभावोऽत्र [illegible] किंचिन्नियामकं। अधिकरणवाचकपदे सप्तमी विभक्तिरसंताभा
वबोधे तत्र। प्रतियोग्यनुयोगिपदयोः समानविभक्तिरन्योन्याभावबोधे इति चेन्न। न पचति चैत्रः चैत्र
स्य न धनमित्यत्र सप्तम्या अभावात्। अलं घुपचतीत्यत्र समानविभक्तेरभावाच्च। अत्राहुः। नञ्विनि
र्मोकैर्यत्र प्रतियोग्यनुयोगिपदयोरभेदान्वयबोधे आकांक्षा तत्रान्योन्याभावबोधकत्वं। अन्यत्रा
[illegible]न्वयबोधकत्वमिति व्युत्पत्तिः। अस्ति च न घटः पट इत्यत्र नञ्सत्वे घटपटयोरभेदान्वयबोधे
आकांक्षा। अतस्तत्रान्योन्याभावप्रत्ययः। भूतले न घट इत्यत्र नञ्विनिर्मोकैर्भेदान्वये आकां नाद
क्षेति। तत्र संसर्गाभावप्रत्यय एवेति संक्षेपः। व्यंजना च न वृत्त्यंतरं लक्षणयैव तदर्थसिद्धेः। न चेदमयु
क्तं। तथाहि। लक्षणायां मुख्यार्थे इतरान्वयानुपपत्तिर्बीजं। न हि व्यंजनायां सर्वत्रास्ति। गच्छ गच्छसीत्या सा४
दौ तदभावात्। अतो वृत्त्यंतरमास्थेयमिति चेत्। किमिदं लक्षणाबीजत्वं। न तावत्तज्जनकत्वं। गंगा
तीरयोः संबंधस्यानुपपत्तिज्ञानानन्यत्वात्। नापि तज्ज्ञापकत्वं। अनुपपत्तिज्ञानमंतरेणापि गंगातीरयोः १६
संबंधस्य चक्षुरादिना ग्रहात्। नापि तत्तात्पर्यग्राहकत्वं। तात्पर्यव्याप्त्यंतरेणोतद्ग्रहात्। अथ लक्षणा

चं५ पि२ क२

जन्यशाब्दबोधे सहकारित्वं तदिति [illegible]ं चेन्न । षष्ठीः प्रवेशयेत्यत्र व्यभिचारात् । तात्पर्यविषयानुपपत्तिर
त्राप्यस्तीति चेत् तर्हि तात्पर्यानुपपत्तिरेव सर्वत्र लक्षणाबीजमस्तु सा चेहाप्यस्ति । स्यादेतत् । गंगायां घोष
इत्यादौ लक्षणाप्रयोजनं शैत्यपावनत्वादिप्रतीतिः । न च तत्प्रतीतिर्लक्षणासाध्या । प्रयोजनाभावात् । ल
क्षणायाश्च प्रयोजनवत्त्वनियमात् इति चेन्न । लक्ष्यप्रतीतेरेव प्रयोजनत्वात् तथापि प्रयोजनान्त
रं नास्तीति चेन्नतः किं लक्षणाया हि प्रयोजनवत्त्वेन नियमो न तु लक्ष्यप्रतीत्यतिरिक्तप्रयोजनवत्त्वे
न गौरवात् अप्रयोजकत्वाच्च । स्यादेतत् । नानार्थस्थले नावदर्थविशेषप्रत्यये प्रकरणादिनि
र्णायकं । तथा च यत्र प्रकरणादिशून्यमर्थान्तरं प्रतीयते तत्र मूलं सहकार्यभावात् । नापि लक्ष नाभिधा ।
आः णा । अयोगात् । तस्मात्सिद्धं शक्त्यन्तरे लेति चेत् न । प्रकरणादीनामनुगततया सहकारित्वानुपप
त्तेः । तात्पर्यग्राहकत्वेनैषामनुगमइति चेत् तर्हि लाघवात्तात्पर्यग्राहक एव सहकार्यस्तु स चेहाप्यस्ति ।
स्यादेतत् । लक्षणा हि पदवृत्तिरियं तु पदतदेकदेशवाक्यरचनार्थभंग्या घोकाराश्रितेत्याश्रयभे
दाद्भेद इति चेन्न । असिद्धेः । न देकदेशाद्यो ह्यर्थविशेष तात्पर्यग्राहकाः न तु तत्प्रतिपादका इति ।

प्रं॰ २७ 17

स्यादेतत्। लक्षणेतात्पर्यज्ञानं लक्षणासहकारि न तु व्यंग्यार्थतात्पर्यग्रहः नियतस्वात्मरचितकाव्ये तो ता
त्पर्यविषयस्यापि व्यंग्यस्य चमत्कारकारित्वादिति चेन्न। व्यंग्येतात्पर्यग्रहस्यानपेक्षायां गंगायां
घोष इत्यादौ शैत्यपावनत्वादिकमेव प्रतीयते न तु केशवालुकादिमत्त्वमिति नियमो न स्यात्। वास्त
नाविशेषपरिपाकान्नियम इति चेत् न तर्हि लक्षणास्थलेपि स नियामकोस्तु कृतं तात्पर्यग्रहणे एव ४
ति। वस्तुतो व्यंजनायां गंगापदं गंगापदशैत्यत्वमागाद् इत्यर्थस्यास्तात्पर्यमुन्नीयते संभाव्यते वा। न तु मागा
इति निरूप्यते इत्यलंकृतं इत्यन्तरेण। स्यादेतत्। यद्ये[illegible]तेऽ एवं हन्ती कथं तर्हि प्रजयतीत्यादौ प्रक
र्षबोधः। न प्रादेः प्रकर्षद्योशक्तिः तस्य द्योतकत्वात्। न च लक्षणा। अशक्यत्वात्। उच्यते। जय
तिरत्र प्रकर्षजयलक्षकः। प्रशब्दस्तु तात्पर्यग्राहं तत्त्वमेव द्योतकत्वं। न च जयः [illegible] शक्य एव
प्रकर्षो लक्ष्य इति वाच्यं। जयमात्रे हि शक्यं न तु विशिष्टजयः। तदाहुः। ह। क्यादन्येन सूचे
ण ज्ञाते भवति लक्ष[illegible]णेति। ननु प्रादेरेवं कथं प्रकर्षद्योशक्तिः कल्प्यते इति चेत् न। अन्यलभ्यत्वा श्रीः
दिति गृहाण। व्यतिसेद् इत्यत्र तु लुणो धातुरेवार्थं प्रत्याययति। धातुलोपमजानतस्तु तत्रार्थप्रस २५

याभावादितिसंक्षेपः। स्यादेतत्। आख्यातस्य तावद्घञ्ल्यवशक्तिः। पचतीत्यस्य पाकं करोतीति विवरणात्॥
व्यवहारवद्विवरणादपि शक्तिग्रहात्। तथा च रथो गच्छतीत्यत्र न मुख्यप्रयोगः। रथादीनामचेतन
तया गमनानुकूलप्रयत्नशून्यत्वात्। नापि लक्षणा। विभक्तौ लक्षणानंगीकारात्। अन्यथा या
नुशासनवैयर्थ्यात्। अतः सिद्धं रत्यन्तरं लेतिचेत् न। व्यत्ययानुशासनबलाद्विभक्त्यर्थेऽन्यस्मिन्नल
क्षणा। न त्वन्यत्रापि। इह च न विभक्त्यर्थे लक्षणा किंतु व्यापारे। दृश्यते च विभक्त्यर्थेऽप्यानुशासनि
की लक्षणा यथा योगे षष्ठ्याः कर्मत्वे। न च कर्मत्वमपि संबंधः स च षष्ठ्यैवेति न लक्षणा। क
र्मत्वत्वप्रकारस्य तया विनासंभवात्। तत्प्रकारकबोधो भवत्येव। किं च संबंधत्वप्रकारक इति चेत्
न। अनुशासनवैयर्थ्यात्। द्वितीयाया असाधुत्वज्ञापकमनुशासनमिति चेन्न। निष्ठादिवर्जन
वैफल्यात्। तत्र द्वितीयायाः साधुत्वज्ञापकमिति चेत् न। कृत्ययोगे विकल्पविधानवैयर्थ्यात्। अ
निषिद्धे नैव तृतीयोपपत्तेः। पाक्षिकषष्ठ्यर्थं तदिति चेत् न। संबंधत्वप्रकारकबोधजनिकायाः
शेषवचनादेव सिद्धेः। निष्ठादियोगे षष्ठ्याः असाधुत्वज्ञापकं तदिति चेत् न। तद्योगेऽपि ता

मं०
१८ दृश्याः चक्षुषु दर्शनात् । किं च यदि विभक्त्यो न लक्षणा कथं तर्हि भाविनं घटं जानातीति विषय
18 तायां कर्मत्वे शक्याद्वितीया । विषयतैव द्वितीयार्थः क्रियाजन्यफलशालित्वापेक्षया लघु
त्वादिति चेन्न तर्हि ग्रामं गच्छतीत्यत्र कुतः कर्मत्वप्रतीतिर्लक्षणां विनेति विभावनीमायुष्म प२
ता । आस्तां तत्रापि द्वयं तरमित्तिचेन्न । क्लृप्तसत्त्वे सैवोपपत्तेः । मीमांसकास्तु । अनुकूलव्यापारमात्रमा
ख्यातार्थः । रथो गच्छतीत्यादौ मुख्यप्रयोगदृष्ट्याहुः । तन्न । यत्नत्वस्य जातित्वेन तस्यैव शक्यतावच्छेद
कत्वात् । न त्वनुकूलव्यापारस्य तत्त्वे गुरुत्वात् । कथं तर्हि पाकानुकूलतायत्नस्य भासत इति चे
त् । संसर्गविधया त्वेवेति । कथं तर्हि जानाति इच्छति यतते करोतीत्यादयः प्रयोगाः । न हि ज्ञा
नाद्यनुकूलो यत्नोऽस्ति प्रतीयते वेति चेत् आश्रयतालक्षकत्वादाख्यातस्येति गृहाण । चिंता
मणिकृतस्तु । जानातीत्यादौ धात्वर्थ एवाश्रयत्वादौ साक्षादन्वेति । आख्यातप्रतिपाद्यः कालः सं
ख्या च नतु यत्नोऽप्ययोग्यत्वादित्याहुः । तच्चिंत्यं नामार्थधात्वर्थयोः साक्षाद्भेदान्वयस्याव्यु श्रीः
त्पत्तेः । अन्यथा ओदनः पचतीत्यत्र ओदनपाकयोः कर्मतासंसर्गान्वयः स्यात् । वस्तुतो १८

जानातीत्यादौ आख्यातार्थो नव भासे। आख्यातार्थसंख्यान्वयो न स्यात्। तस्याख्यातार्थविशेष्यगामि आ२
त्वात्। विभक्त्यर्थविशेषणीभूतो नामार्थ आख्यातार्थविशेष्यः। तेन चैत्र ओदनं पचतीत्यत्र तथाविधश्चै
त्र आख्यातार्थविशेष्यः। न त्वोदनार्थः। द्वितीयार्थविशेषणत्वात्। पच्यते इत्यत्र कर्मणि कर्तात्तृतीयार्थविशे धा३
षणत्वात्। स्थीयते इत्यत्र स्थितस्यानुकूला कृतिरिति न कस्यापि आख्यातार्थविशेष्यमिति संख्यान्वितैव। ख४
अत एवौत्सर्गिकमेकवचनमेवेत्यूचुः। धात्वर्थविशेष्यकोऽत्रान्वयबोधः। न चैवं धात्वर्थस्य द्वित्वादिविवक्ष
याद्विवचनाद्यापत्तिः। असाधुत्वादित्यपि कश्चित्। स्यादेतत्। आख्यातार्थः कालः कुत्रान्वेतीति चेत्
ख५ एकपदोपात्तप्रत्यासत्त्या कृतावित्यवेहि। धात्वर्थ इत्यपरे। कथमन्यथा जानातीत्यादौ ज्ञाने वर्तमा
नत्वादि प्रतीयत इति। स्यादेतत्। भविष्यत्तातीतत्वे अपि आख्यातविशेषवाच्ये। भविष्यत्त्वं च विद्यमा
नप्रागभावप्रतियोगित्वं। विद्यमानध्वंसप्रतियोगित्वमतीतत्वमिति। पचति चैत्रे भाविकृतिमादाय
पक्ष्यतीति। आद्यकृतिमादायापाक्षीदिति स्यात्। न स्यादाद्यकृतिप्रागभावस्येव भविष्यत्त्वस्य
येन चरमकृतिध्वंसस्येवातीतप्रत्ययेनाभिधानात्। अथौदनं पचतीत्यत्रौदननिष्ठविक्लित्तिजन

मं· १९ 19

कव्यापारविशेषकर्तृत्वं प्रतीयते। तत्र विक्लित्तिः तदनुकूलव्यापारश्च कस्यार्थः। उच्यते। विक्लित्तिः फ
लं तत् द्वितीयार्थः तदनुकूलो विलक्षणव्यापारो धात्वर्थः अनुकूलत्वं च ता च संसर्गः। ननु कर्मत्वं
च द्वितीयाया वाच्यं। तच्च क्रियाजन्यफलशालित्वं न तु फलमात्रमिति चेन्न। क्रियाया धातुवाच्य
त्वात्। जन्यत्वाश्रयत्वयोश्च संसर्गमर्यादया लाभात् फलमात्रे एव शक्तेः कल्पनात्। अनन्य
लभ्यो हि शब्दार्थः। ननु फलमपि धातुलभ्यमेव फलानुकूलो हि व्यापारो धात्वर्थ इति चेन्न॥
फलानुकूलत्वोपलक्षितो विलक्षणव्यापारो हि धात्वर्थः। न तु फलानुकूलत्वमपि। गौरवात्। नन्वे
वं त्यजिगम्योः पर्यायता स्यात्। तथा हि। संयोगानुकूलं कर्म हि गमेरर्थः। विभागानुकूलं च
कर्म त्यजेरर्थः। तत्र यदि फलानुकूलत्वमुपलक्षणं तदा कर्ममात्रं शक्यं तत्रैवाच्यं। तथा च
कुतो न पर्यायता। आस्तां पर्यायता को दोष इति चेन्न। ग्रामं गच्छतीति वत् वृक्षो ग्रामं त्यजती
त्यापत्तेः। मैवं। गच्छतीत्यादि समभिव्याहृत द्वितीयायाः संयोगरूपफलबोधकत्वव्युत्पत्तेः॥
त्यजतीत्यादि समभिव्याहृत द्वितीयायाश्च विभागबोधकत्वव्युत्पत्तेरेव यथोक्तादिप्रसंग निरा श्रीः १९

सात्।न्यायभास्करकृतस्तु।फलमवच्छेदकमेवाद्धितीयार्थस्त्वाश्रयता।नचैवंभूमौपर्णंप
तनीत्यत्रभूमिपदाद्वितीयापत्तिः।समभिव्याहृतधात्वर्थतावच्छेदकफलाश्रयतायाबोधकत्व
व्युत्पत्तेः।अतएवधात्वर्थतावच्छेदकफलशालित्वं कर्मत्वमितिलक्षणंध्रुवं।नहिक्रियाजन्यफ
लशालित्वंतत्।वृक्षाद्भूमौपततीत्यत्रवृक्षभूम्योःकर्मजन्यविभागसंयोगाश्रयतयाक
र्मत्वापत्तेः।ननुतथाप्यधःसंयोगानुकूलव्यापारस्यपतत्यर्थतयाकर्मत्वंभूमौदुस्त्यजमितिचेन्न।पतत्य
र्थेफलस्यानंगीकारात्।तद्धात्वर्थानधिकरणत्वेसतीतिविशेषणाच्च।नचैत्रस्यधात्वर्थतावच्छेदक
फलेग्रामसंयोगाश्रयत्वेसत्यपिकर्मत्वमितिस्वीकुर्वन्तीतिसंक्षेपः।तस्यशब्दस्यनिराकांक्षादेर्न्यया
बोधकत्वादाकांक्षादिसहकारि।तत्रयत्पदंयत्पदेनसहयादृशानुभवजनकंतत्पदस्यतत्पद
समभिव्याहारस्तादृशान्वयबोधेआकांक्षा।भवतिहिनामपदंउत्तरवर्तिविभक्तिपदेनैव
सहान्वयबोधकंअतस्तत्समभिव्याहारस्तादृगन्वयबोधेआकांक्षा।अतएवघटःकर्मत्व

वच्छेदकत्वा५ स्यतं१ न्यया२

॥२० मिसतो न घटमितिवदन्वयबोधः। आकांक्षाविरहात्। धातुपदं चाख्यातेनैव सहान्वयविशेषबो
धकं भवति तत्राख्यातपदसमभिव्याहार आकांक्षा। अत एवानयनं कृतिरित्यत्रानयतीतिवन्ना
न्वयबोधः। कृतिवाचकाख्यातसमभिव्याहाराभावेन निराकांक्षत्वात्। ननु नामपदं द्वितीयादि
विभक्तिसमभिव्याहृतमेव कर्मत्वादीनामाश्रयाश्रयिभावेनान्वयबोधकमिति चेन्न। नाम्नः स्वार्थ
निष्ठकर्मत्वानुभवजननेन तदुपस्थापकविभक्तिसहकारित्वमिति गृहाण। इत्थं यस्य पुंसो घटः कर्म
तस्य६ त्वमित्यादिवाक्यव्युत्पत्तिरभूत् कुतस्ततोन्वयबोध इति चेन्न। तस्मिन्पुरुषे एवमानं नास्ति काक
स्या५ थान्वयबोधे। तथापि यदि कश्चित्तादृशः स्यात्तस्य किं भविष्यतीति चेन्न। अशाब्दानुभववैधुर्य
मेव। अन्वयव्यतिरेकसिद्धकारणविरहादिति। एतस्या आकांक्षाया ज्ञानं हेतुः तद्भ्रमेणान्वयबोधा
त्। अपरा च प्रकृतान्वयबोधसमानाकारकस्वजन्यान्वयबोधविरहः प्रकृतान्वयबोधे स्वरूपस
ती हेतुराकांक्षा। अतो घटमानयतीति पदं एकदान्वयबोधे जनिते नान्वयबोधान्तरं जनकं। स्वजन्या
न्वयबोधवैधुर्यविरहात्। एवं च घटमानयेत्यतोन्वयबोधे जाते दंडेनेत्यन्वयबोधे निराकांक्षतास्या श्रीः ॥२०

दतद्धर्मप्रकृतान्वयबोधसमानाकारेति। न च गामानयेत्यन्वयबोधः प्रकृतो येन दंडेन गामानयेत्यन्व
यबोधः। तेन समानाकार इति दिक्। योग्यता चापरपदार्थे एकपदार्थस्य प्रकृतसंसर्गवत्वं। तेन पय
सा सिंचतीति योग्यं। पयसि सेकसंसर्गकस्य सत्वात्। यस्मिंश्च पयसि सेकसंसर्गो नास्ति तस्मिंश्चा
योग्यत्वं। आकाशं शब्दः इत्यत्र समवायसंसर्गवत्वमादाया भेदान्वयबोधेपि योग्यतास्यादतद्धर्म।
प्रकृतेति। अस्याश्च ज्ञानं कारणं। तद्भ्रमेणाप्यन्वयबोधात्। ननु संसर्गस्यापूर्वत्वात्कथं प्रथमं ज्ञा
नं संभवतीति चेत्। उच्यते। योग्यताया ज्ञानमात्रं हेतुः। अस्ति चात्र पयःसेककरणतावन्नवेति संश
तं५ यरूपं ज्ञानं। क्वचिन्निश्चयोपि। यथात्र सक्षेण दृष्टे घटोस्तीति। अपरे तु। असंसर्गग्रहः प्रतिबंधकः तद
भावो योग्यतास्वरूपसती हेतुः। न चैवं जलह्रदो वह्निमानित्यसंसर्गाग्रहदशायां योग्यं स्यात्। इष्टत्वा
त्। न च लाघवात्संसर्गज्ञानं कारणं न त्वसंसर्गाग्रह इति वाच्यं। असंसर्गाग्रहस्य लौकिकसाक्षात्का
रातिरिक्तं पित्तादिदोषाजन्यत्वे विशिष्टज्ञानमात्रे एव हेतुत्वावधारणात्। कथमन्यथा चंदनं न सुरभी
ति निश्चये सुरभि चंदनमिति ज्ञानं न स्यात्। तदभावानुमितावपि चक्षुषा घटस्य लौकिकसाक्षा

मं०
२१ रः। शंखे पीतत्वभ्रमस्य इह दृश्यत इत्यत्रान्यां तां न चाघटो भिधेय इत्यत्र अभिधेयत्वासंसर्गाप्रसि
21 द्धात ... हा ऽ प्रसिद्धिः। अभिधेयत्वप्रतियोगिकत्वेन यो भावभ्रमस्तदभावस्य प्रसिद्धेः। यदि
च सोपि न प्रसिद्धस्तदा आसत्तौ तत्र योग्यता ऽहेतुरेवा न चैवं व्यभिचाराच्छाब्दबोधं प्रति योग्यता
याः कथं कारणत्वमिति वाच्यं न हि शाब्दबोधत्वावच्छेदेन योग्यतायाः कारणत्वं किंतु तदीय
तादृशान्वयबोधे तदीयतादृशान्वयविरहनिश्चयाभावत्वेन विशिष्यैवेति क्व व्यभिचार इत्या
हुः। आसत्तिः पदाव्यवधानं। अत एव गिरिरग्निमानित्यासन्नं। अनासन्नं च गिरिर्भुक्तमग्नि
मान् देवदत्तेनेति। न चैवं स्थाल्यामोदनं पचतीत्यत्र स्थाल्यामित्यस्य पाकेनानासन्नतापत्तिः
ओदनमित्यनेन व्यवधानादिति वाच्यं। प्रकृतान्वयबोधानुकूलपदव्यवधानाभावस्य वि
वक्षितत्वात्। ओदनपदं च स्थाल्यधिकरणक ओदनकर्मक पाककर्त्रन्वयबोधानुकूलमे
वा स्थाल्यां पचतीत्यन्वयेतु अनासन्नमेवेति प्राञ्चः। न चैवं श्लोकादिर्योजनया व्यन्वयः कथं ॥
व्यवहितत्वेन प्रत्यक्षसिद्धं व्यवहितत्वभ्रमासंभवादिति वाच्यं। तत्र हि श्लोकवाक्यान्नान्वयबो श्रीः

धः।किंतुयोजनावाक्यादिसाकूतः।वस्तुतस्तु।आकांक्षादिमत्वेसतितात्पर्यज्ञानेव्यवहितेप्यन्वयबोधात्।तद्विलंबे
नाविलंबाच्चनैतद्ज्ञानं हेतुः किंतु अव्यवहितपदतात्पर्यज्ञानं।तच्चैतत्पदमेतत्पदाव्यवहितोत्तरमभिसंद
धातुरुच्चरित्वभिसंधापयितुरिच्छा।अतएवमौनिश्लोकेप्यासत्तिः।वक्तुरभावेप्यभिसंधापयितुःसत्वात्।
गतिरि ४ शुकवाक्येच भगवत्तात्पर्यमादायैवेतिनव्याः।तदपिन।सत्यर्थतात्पर्यज्ञानाद्येतत्तद्विलंबेनशाब्दबोधवि
लंबाभावात्।तस्मात् हृत्पदजन्यपदार्थोपस्थितिरासत्तिः।साचस्वरूपसतीहेतुः।नहिपदार्थानु
पस्थितावन्वयबोधः।नचहृत्पदजन्येतिव्यर्थं घटपदात्समवायेनाकाशस्मृतौघटोस्तीतिवाक्या
दाकाशान्वयबोधापत्तेः।ननुघटमानयेत्यत्र घटकर्मत्वानयनकृत्युपस्थितीनांनयुगपत्संभवः।आशु
विनाशिनांक्रमिकाणांमेलनासंभवादितिचेन्न।क्रमिकपदानुभवजन्यानेकसंस्कारैर्युगपत्ता
वत्पदस्मरणात्युगपत्तावत्पदार्थस्मृतौतावदन्वयबोधःसंभवतीतिसंक्षेपः।अतएवाव्यवधानेनप
दजन्यपदार्थोपस्थितिरितिपरास्तं।तत्तृतीयांतवैयर्थ्यात्।व्यवहितोपस्थितावेकस्याउपस्थि
तेर्विनाशात्।तात्पर्यंचेदमेतस्मिन्नर्थेऽस्यान्वयंप्रत्याययत्विति प्रयोक्तुरिच्छा।प्रयोक्ता चाभिसंधापयि

मं
२२
22
तन्मात्रं। ननु वक्त्रैव। मौनिश्लोकेऽव्याप्तेः। श्रुतवाक्ये भगवदिच्छैव गतिः। तस्य च निश्चयो हेतुः। अ
स्य च संशये व्यतिरेकनिश्चये वान्वयाबोधात्। तद्बोधे चान्वयबोधाच्चेति संक्षेपः। सोऽयं शाब्दो द्विविधः।
विधिरर्थवादश्च। तत्र विध्यभिधायकः प्रत्ययः तद्घटितं वा विधिः। अभिधेयं च विधिश्च कार्यत्वं। वाक्यं २
तच्च कृतिसाध्यत्वमिति। किमत्र मानमिति चेत्। उच्यते। विधिस्तावत्प्रवर्तकं ज्ञानमिच्छां चाज
स्वबुद्धिः ५ नयित्वा न प्रवृत्तिजननायालं। अतोऽयं प्रवृत्तिजननीमिच्छां सूते स विधेरभिधेयः। प्रवृत्तिजननी
च कृतिसाध्यत्वप्रकारकेच्छा। तज्जननी च कृतिसाध्यत्वप्रकारिका बुद्धिः। कृतसाध्यत्वज्ञाने
तदनुत्पत्तेः। ननु कृत्यसाध्यत्वप्रकारकज्ञानाभावो गौरवात् सर्वदा चिकीर्षोत्पत्त्यापत्तेश्च सर्व
दा तत्संभवात्। अतः कृतिसाध्यत्वमेव विध्यर्थ इति। नन्वेवं मंडलीं कुर्यादिति वाक्या[redacted]
[redacted]दुत्पन्ने कृतिसाध्यत्वज्ञानवतो बलवदनिष्टमेव मंडलीकरणं जानतो मंडलीकरणे प्रवृ
त्तिः स्यात्। अथ बलवदनिष्टाननुबंधिकृतिसाध्यत्वज्ञानमेव प्रवर्तकमिति चेत्तन्न। इ श्रीः २२

नं ५ ननक २

स्यमपि दृष्टाजनकत्वेन बलवदनिष्टाननुबंधिकृतिसाध्यत्वेन च मंडलीकरणं जानतस्तत्र प्रवृत्तिः स्यात्। प्रवृ
त्तिजनकज्ञानस्य सत्त्वात्। अत्र प्राभाकरमतानुवर्त्तिनो नित्येष्वपि चादिमत्वप्रतिसंधानजन्यकार्यताज्ञा
नं प्रवर्त्तकं। अन्यत्र चेष्टसाधनताज्ञानजन्यमिष्टसाधनताज्ञानकालीनं वा कार्यताज्ञानं प्रवृत्तिहेतुः प्र
वृत्तिसामान्ये च कार्यताज्ञानसामान्यमिति न कश्चिद्दोषः। न चैवं लाघवादिष्टसाधनत्वविषयकृ
कार्यताज्ञानमेव प्रवृत्तिसामान्ये हेतुरिति वाच्यं। नित्ये तदभावात्साध्यत्वसाधनत्वयोर्विरोधेन
कदाएकस्मिन्कृतिसाध्यत्वेष्टसाधनत्वयोर्भानासंभवाच्च। कथमनयोर्विरोध इति चेदित्थं। सा
साधनत्वं हि सिद्धधर्मः। असिद्धावस्थातः कार्यानुत्पत्तेः। साध्यं चासिद्धधर्मः सिद्धतादशायां तदभा
वात्। न चैकदा सिद्धत्वमसिद्धत्वं। येनैकदा कृतिसाध्यत्वमिष्टसाधनत्वं च स्यादिति। अत्र जरन्नैया
यिकाः। इष्टसाधनताविषयकं कृतिसाध्यताज्ञानमेव लाघवात्प्रवर्त्तकं। न त्विष्टसाधनताज्ञानजन्य
ना२ कार्यताज्ञानादि गौरवात्॥ न च नित्ये दृष्टसाधनताज्ञानासंभवः फलाभावादिति वाच्यं। नित्येपि
बहुशः फलश्रुतेः। यत्र फलश्रुतिर्नास्ति तत्रापि विश्वजिन्न्यायेन स्वर्गः फलं प्रत्यवायपरिहारो वा।

चं१

मं.
रघु
ना
23

नचैवं फलकामनाधीनकर्त्तव्यत्वे काम्यत्वं स्यान्न तु नित्यत्वमिति वाच्यं। नहि फलकामनानधीनकर्त्तव्यत्वं
नित्यत्वं ब्रूमः किंतु यदकरणे प्रत्यवायस्तत्त्वं। तच्च कामनोपाधिकर्त्तव्यत्वेप्यक्षतमेव। नचैवं फले यदा
कामना नास्ति तदा संध्यावंदनादौ प्रवृत्तिर्न स्यादिति वाच्यं। इष्टत्वात्। नहि प्रयोजनमनुद्दिश्य मंदोपि
प्रवर्त्तते। नचैवं फलकामनाधिकारिविशेषणं स्यात्। तथा च फले यदि कामना नास्ति तदा पुरुष
स्याशुचेरिवानधिकारित्वान्नित्याकरणेपि प्रत्यवायो न स्यादिति चेत्। यदि तत्र प्रत्यवायः प्रामा
णिकः स्वीक्रियते तर्हि कामनाधिकारिविशेषणं न तु वेदबोधितमिष्टसाधनत्वमपि प्रामा
णिकत्वात्। कैश्चित्तु वाकामनेतरयावदधिकारवतामकरणे एव प्रत्यवायहेतुरिति न किंचिदेतत्। न
चेष्टसाध्यत्वसमानत्वयोर्विरोधः। एकस्मिन्पाके ओदनसाधनत्वकृतिसाध्यत्वयोः सत्त्वात्। कथमन
न्यथा न वेष्टसाधनताज्ञानकालीनं कार्यताज्ञानं प्रवर्त्तकमिति। कृतिसाध्यत्वे च बलवदनिष्टाननु
बंधित्वं विशेषणं देयं। नातो मधुविषसंपृक्तान्नभोजने कृतिसाध्यत्वेन सुखसाधनत्वेन ज्ञानेपि प्रवृत्तिः।
बलवदनिष्टाननुबंधित्वग्रहात्। यदा च बलवदनिष्टाननुबंधित्वेन ज्ञायते तदा प्रवर्त्तत एव। एवं च बल
वदनिष्टाननुबंधीष्टसाधनत्वे सति कृतिसाध्यत्वविषयकं ज्ञानं प्रवर्त्तकं। विध्यर्थोपि बलवदनिष्टान

श्रीः
रामः

नुबंधीष्टसाधनत्वे कृतिसाध्यत्वं। अत एव कलंजभक्षणस्येष्टसाधनत्वे सति कृतिसाध्यत्वेपि बलवदनि-
शि २ ष्टाननुबंधित्वाभावाद्विष्टाभावोस्तीति न कलंजं भक्षयेदिति विध्यर्थनिषेध उपपद्यते। कथं तर्हि श्ये-
नेनाभिचरन्यजेतेत्यत्र प्रवृत्तिः। श्येनस्य हिंसात्वेन नरकरूपबलवदनिष्टानुबंधित्वादिति चेन्न। श्येनो का ४
हि वधसाधनं न तु नरकसाधनं। मानाभावात्। श्येनाद्धि वधो वधाच्च नरक इति न तत्रास्तिनां प्रवृत्तिः।
ननु श्येनो मरणानुकूलव्यापारत्वेन हिंसा सा च नरकजनिकेति चेन्न। न हि मरणानुकूलव्यापारमात्रं
हिंसा। कूपादौ विनष्टगवि तत्कर्तुर्गोवधकर्तृत्वप्रसंगात्। नापि मरणोद्देशेनानुष्ठीयमानत्वे सतीति
विशेषितं तत्। गंगामरणमुद्दिश्य कृतत्रिसंध्यस्तवपाठादेरपि तथात्वोपपत्तेः। अदृष्टाद्वारकमरणा-
नुकूलत्वं विवक्षितमिति चेन्न। तर्हि कथं श्येनस्य हिंसात्वमिति। नव्यास्तु बलवदनिष्टाननुबंधीष्टसा-
धनत्वे सति कृतिसाध्यताज्ञानत्वेन हेतुत्वं। कृतिसाध्यत्वे सति बलवदनिष्टाननुबंधीष्टसाधन-
ताज्ञानत्वेन बलवदनिष्टाननुबंधिकृतिसाध्यत्वे सतीष्टसाधनताज्ञानत्वेन वेत्यत्र विनिगमना-
विरहः। अस्तु तेन तेनैव रूपेण हेतुत्वमिति चेन्न। न हि कार्यता ताज्ञानत्वादिनैव हेतुतास्तु लाघवा-

मं.
२५
२५

त्। वस्तुतस्तु। कृतिसाध्यताधीत्वेनैव चिकीर्षां प्रति हेतुत्वं। नन्वेवमनिष्टाजनकेपि चिकीर्षा स्यादिति चेत्। स्यादेव सुखादौ
इष्टाजनकत्वेन ज्ञाते मंडलीकरणादौ चिकीर्षा स्यादिति चेन्न। उपायेच्छासामान्यसामग्र्यभावात्। ननु केयमु
पायेच्छासामान्यसामग्रीति चेत्। इष्टसाधनताज्ञानं बलवदनिष्टाननुबंधित्वज्ञानं च। बलवदनिष्टसाधनता
त्वं ४ ज्ञानं वा प्रतिबंधकं। इष्टसाधनत्वं विद्यमानेच्छाविषयोयस्तत्साधनत्वं। इच्छाविषयत्वं स्वरूपसद्विशेषणं। ननु
तस्यापि ज्ञानं कारणं। एवं च यदा सुखादेरिच्छा पाकादौ सुखसाधनताधीस्तदा पाकादाविच्छेति ध्येयं। विध्यर्थो
पि इष्टसाधनत्वं कृतिसाध्यत्वं बलवदनिष्टाजनकत्वं च न तु विशिष्टं। विशेषणविशेष्यभावे विनिगमनाभा
ध६ वात्। न कलंजं भक्षयेदित्यत्र कृतिसाध्यत्वेष्टसाधनत्वयोर्नञर्थान्वयः। तस्य कार्यत्वादिष्टसाधनत्वाच्च। किं नइ
तु बलवदनिष्टाननुबंधित्वस्य श्येनेनाभिचरन्यजेतेत्यत्र बलवदनिष्टाननुबंधित्वस्य च नान्वयः। बा
त्वं ४ धात्। इष्टसाधनत्वकृतिसाध्यत्वयोस्तु अन्वयः स्यादेव। अबाधादिति संक्षेपः। सोयं विधिस्त्रिविधः।
अपूर्वविधिर्नियमविधिः परिसंख्या चेति। तदुक्तं। विधिरत्यंतमप्राप्तौ नियमः पाक्षिके सति। त
त्र चान्यत्र च प्राप्तौ परिसंख्येति कीर्त्यत इति। उदाहरणानि। व्रीहीन्प्रोक्षति। व्रीहीनवहंति। पं श्री:
च पंचनखा भक्ष्या इत्यादि। अत्र गुरवः। नेष्टसाधनत्वं विध्यर्थः। स्वर्गकामो यजेतेत्यनेनवि २५

विधिना तस्य बोधयितुमशक्यत्वात्। तथाहि। स्वर्गकामस्येष्टसाधनं याग इत्यनेन बोध्यं। इष्टं चात्र का
म्यत्वेनोपस्थितः स्वर्ग एव। न चेदं शक्यं। साक्षात्साधनत्वस्याशुविनाशित्वेनासंभवात्। न च परं
परया स्वर्गसाधनं बोध्यं। परंपराघटकापूर्वानुपस्थितेः। नापि कार्यत्वं। स्वर्गकामिकार्यत्वस्य
यागे बोधयितुमशक्यत्वात्। तथाहि। शाब्दबोधे योग्यताज्ञानं हेतुः। योग्यता चान्वयप्रयोजकरू
पवत्वं। अत एव सेकान्वयप्रयोजकं द्रवद्रव्यत्वं जलेऽस्तीति तद्योग्यं। वह्नौ नास्तीति तदयोग्यं। प्र
कृते तु कामिकार्यत्वान्वये तु योग्यतेष्टसाधनत्वमन्वयप्रयोजकं। न च तद्ग्रहीतुं शक्यमित्युक्तं।
अन्वयप्रयोजकस्य साधनस्यत्वस्य विरहात्। तस्मात्कार्यमेव विध्यर्थः।। तस्मिंश्च यागस्य
विषयतयान्वयः। ननु पूर्वस्य पूर्वमनुपस्थितत्वात्तच्छक्तिग्रहोऽनुपपन्नः। अथ कार्यत्वेन कार्य
सामान्यलक्षणशक्तिग्रहो योग्यताबलाच्चापूर्वस्य व्यक्तेर्लाभः। नहि यागविषयकमन्यत्कार्यं संभ
५५ वतीति चेन्न। स्वस्तानादेरपि संभवात्। उच्यते। कार्यं तावत्स्वर्गकामस्यान्वयो नियोज्यनियोज
कभावलक्षणः। तत्र कामी नियोज्यो नियोजकं च कार्यं। अतः कार्यं नियोजकत्वमेव स्वर्गका

मस्यान्वयः नियोजकत्वं च तत्कामिकार्यतया प्रतीयमानत्वं। अत्रान्वयप्रयोजकं काम्यसाधनत्वं। न
त्वे२ हि कामी काम्यादन्यत्काम्यसाधनात्मतं कार्यतयावैति। न च काम्यासाधनं काम्यसाधनत्वेन
२५ ज्ञायते। अन्यथाख्यातेरनभ्युपगमात्। न च ज्ञानं काम्यस्य स्वर्गस्य साधनं संभवतीति। अतो
ता४ योग्यताबलाद्यागविषयकं कार्यं स्वर्गकामीयं। स्वर्गकामो यागविषयककार्यवानित्येवं वानुभ
वन् योग्यतया पूर्वमालंबते। एवं च काम्येच्छा तत्र शक्तिर्लिङः नियोगनिषेधो वाऽपूर्वमाह। लोके
च पचेदित्यादौ अपूर्वतात्पर्यासंभवात्कार्यत्वे लक्षणेत्याहुः। अत्रोच्यते। कार्यत्व एव विधेः श
क्तिर्लाघवात्। न तु कार्यत्वविशिष्टे। न च यागे स्वर्गकामकार्यत्वान्वयबोधासंभवः। बाधकाभावात्।
न च योग्यताज्ञानविरहो बाधकः। नत्वन्वयप्रयोजकरूपवत्त्वं योग्यता सेकान्वयितोयेपि
सत्वात्। किंतु प्रकृतसंसर्गवत्वं। तस्य च संशयसाधारणज्ञानं हेतुः। न च यागे स्वर्गकामकार्य
त्वस्य संशयो न संभवतीति चेन्नैवं स्यात्। पश्चोक्तं। इष्टसाधनत्वं न विध्यर्थः। यागे तस्य लिङा बो श्रीः
धयितुमशक्यत्वादिति। तदपि न। बाधकाभावात्। उक्तमेव बाधकमिति चेन्न। साक्षात्स

रं परात्वं मुदस्य साधनता सामान्यस्य लिङ्गाबोधनात्। यथा रूपवां श्चैत्र इत्यत्र नीलत्वाँन्युदस्य टी.१.
रूपसामान्यं ज्ञानं। अथैकविशेषबाधे शाब्द सामान्यं तदितरतद्विशेषप्रकारतानियतं। यथा
घटेन जलमाहरेत्यत्र घटद्बाधे छिद्रीतरत्वेन घटज्ञानं। अतो न साक्षात्वबाधे परं परात्वप्रका
रा४ रकं ज्ञानं कार्यं तच्च न संभवति द्वाँनुपस्थितेरिति चेन्न। घटेन जं माहरेत्यत्र योग्यतया ल.४
वस्तुतोयच्छिद्रेतरः तदन्वयो न तु तदितरत्वेन तदुपस्थापकाभावात्। न च लक्षणया तदुप
स्थितिः मानाभावात्। आस्तां वात्रापि साक्षादन्यसाधनत्वप्रकारेणैवान्वयः किं न च्छिन्नं।
अथ योग्यताज्ञानविरहो बाधकः। तथाहि। आशुविनाशिनः कालांतरभाविफलजनक
प्रयो४ त्वे फलसमयपर्यंतस्थायि व्यापारजनकत्वमन्वयजनकं। न चेह तथा ज्ञानं संभवतीति चेन्न
अन्वयप्रयोजकरूपवत्वस्य योग्यतानिरासात्। नन्वेवं कथमपूर्वमलाभदृतिचेन्न। आ
शुविनः कालांतरभाविफलजनकस्य तत्कालस्थायिभावव्यापारकत्वव्याप्तेः। तदु
क्तमाचार्यैः। चिरध्वस्तं फलायालं न कर्मातिशयं विनेति। भट्टास्तु। धर्मिकल्पनातो धर्म

तीर

मं. २८ कल्पनाया लघुत्वात् यागादेरेव स्थायित्वं युक्तं न त्वपूर्वं। न चैवमिदानीं यागप्रत्यक्षतापत्तिः। आत्मविशेषगु
णानां द्व्यणुकादेरिवायोग्यत्वादित्याहुः। तन्न। इदानीं न यजेऽहमिति प्रत्यक्षविरोधात्। विधिभिन्नोऽर्थवा यर
दः। स तु त्रिविधः। गुणवादोऽनुवादो भूतार्थवादश्चेति। तदुक्तं। विरोधे गुणवादः स्यादनुवादोऽवधारि
ते॥ भूतार्थवादस्तद्धानादर्थवादस्त्रिधा मतः॥ सोयं शब्दोऽनित्यः। उत्पन्नो गकारः नष्टो गकार इति प्रती
तेः। अत्र गुरवः। नित्यः शब्दो व्योमैकगुणत्वात्। तत्परिमाणवत्। न चाप्रयोजकं। सोयं गकार इति प्र
त्यभिज्ञानस्यान्यथानुपपत्तेः। न चायं भ्रमो बाधकाभावात्। न चोत्पत्त्यादिप्रतीतिर्बाधिका। तस्याः
व्यंजकवायूत्पत्त्यादिविषयकत्वादित्याहुः। तन्न। गकारत्वगतत्वेन उत्पत्त्यादिप्रतीतेः। न चासौ भ्रां
तिः बाधकाभावात्। प्रत्यभिज्ञानं बाधकमिति चेत्। अनयैव बाधिता सा किं न स्यात्। न ह्यत्र वि
निगमकमस्ति। नन्वेवं विनिगमकाभावे विनाशादिप्रत्ययस्यैव कुतोऽबाधितत्वमिति चेन्न। उ
त्पत्तिविनाशयोरुभयोर्बाध्यत्वकल्पनापेक्षया प्रत्यभिज्ञानमात्रस्य बाध्यत्वकल्पनाया लाघवात्।
अन्ये तु विनिगमनाभावादुभयोरेव प्रमात्वं कल्प्यमिति चेत्। प्रत्यभिज्ञानस्य गत्वावच्छिन्नभेदा श्रीः
भावविषयत्वात्। तथा च सति गकारोयमिति स्यात् न तु सोयमिति चेत्। सोयमित्यस्य त इति २८

गत्वावच्छिन्नाभिन्नोयमित्यर्थात्। गकारोयमित्यत्र च गत्वेन तद्वृत्तित्वावगाहनात्। तथा च सति तज्जातीयोयमिति स्यादि
ति चेन्न। गत्वे जातित्वानवभासनादित्याहुः। भट्टास्तु शब्दो नित्यो निरवयवद्रव्यत्वात्। आत्मवदित्याहुः। तदपि न। उक्तदो
भावा२ षात्। शब्दस्य द्रव्यत्वे मानाभावाच्च। शब्दो द्रव्यं साक्षात्संबंधेनेंद्रियग्राह्यत्वात् घटवदिति चेन्न। अप्रयोजकत्वात्। शब्द
स्य नीरूपद्रव्यत्वेन बहिरिंद्रियाग्राह्यत्वापत्तेः। अन्ये तु वर्णा नित्या ध्वन्यन्यशब्दत्वात्। स्फोटवदित्याहुः। त
दपि असत्। एवं निरस्तः। दृष्टांतासिद्धेश्च। न हि वर्णान्यस्फोटः प्रमाणसिद्धोस्ति। नन्वस्ति सः। तथाहि। पदानां वर्णकदंबरूपाणां
माशुतरविनाशितया मेलनासंभवादप्रत्यक्षत्वं तावन्निरूढं। तथा च तदप्रत्यये कुतोर्थप्रत्ययः स्यात्। तस्माद्वर्णा
भिव्यंग्यः पदस्फोटः कश्चिदभ्युपेयः अतोर्थप्रत्यय इति। तदशुद्धं। स हि स्फोटस्तावद्वर्णव्यंग्यः तावत्ताम
ध्येयत्किंचिद्वर्णव्यंग्यो वा तावद्वर्णाभिव्यक्तिव्यंग्यो वा। नाद्यः। आशुविनाशिनां क्रमिकाणां मेलनासंभवात्।
न द्वितीयः। घकारोच्चारणे घटपदस्फोटप्रसंगेऽर्थप्रत्ययापत्तेः। वर्णान्तरवैफल्याच्च। नांत्यः। तदसंभवात्। अथ पूर्व
वर्ण२ पूर्वगोचरसंस्कारसहितचरमवर्णोपलंभस्तद्व्यंजक इति चेत्तर्हि स एवार्थप्रत्यायकोस्तु कृतं स्फोटेन॥
अथ पदप्रतीतिबलात्सिद्धिरिति चेन्न। तस्याः क्रमविशेषवत्तावद्वर्णगोचरत्वात्। तावद्वर्णगोच

मं० रप्रत्यय एव न संभवतीति चेन्न। तावद्वर्णगोचरसंस्कारात्समूहालंबनरूपतावद्वर्णगोचरस्मरणसंभवात्॥ न
२७ नु तावद्वर्णमात्रं न पदं। अर्थप्रत्यायकत्वात्। अन्यथा नदीदीनयोरविशेषापत्तेः। किंतु आनुपूर्वीविशेषविशिष्टं ता
वद्वर्णरूपं। न च तत्प्रत्ययः संभवतीति चेन्न। घोत्तरत्वं हि टस्यानुपूर्व्यं। अस्ति च तस्य प्रत्यक्षत्वं। घोत्तरं टं शृणोमी
२७ ति प्रतीतेरिति दिक्॥ नन्वर्थापत्तिरपि प्रमाणांतरं। तथाहि। पीनो देवदत्तो दिवा न भुंक्ते इति प्रत्ययानंतरं दिवाऽ
भोजिनः पीनत्वं रात्रिभोजनं विनानुपपन्नमिति तत्कल्पयति। न चात्र प्रत्यक्षादिप्रमाणं। किंत्वनुपपत्तिज्ञानं
सैवार्थापत्तिरिति चेन्न। केवलव्यतिरेकिण्येवोपपत्तेः। तथाहि। देवदत्तो रात्रौ भुंक्ते दिवाऽभुंजानत्वे सति पी
मो५ नत्वात्। यन्नैवं तन्नैवं। यथा दिवारात्रावभुंज्यपीन इति। अर्थापत्तिदपे च केवलव्यतिरेकिण्येव नामांतरमिति सं
क्षेपः। अविदितकर्तृकः शब्दविशेष एवैतिह्यं नाम। स यदि मानं तदाप्त एव नो चेत्प्रमाणमेव नेत्युभयथापि न
मानांतरमिति सिद्धं नित्यत्वादि प्रमाणानि। ननु सर्वमिदं प्रमात्वसिद्धौ स्यात्। तदेव तावदसिद्धं। नहि तत्प्र तुकुतः
त्यक्षं ज्ञानस्यातींद्रियत्वात्। अन्यथा ज्ञानतज्ज्ञानानां ज्ञानमेव स्यात्। न तु विषयांतरसंचार इति। अत्र श्रीः
गुरवः। स्वप्रकाशमेव ज्ञानं। घटादिकमिव स्वात्मानं स्वाधिकरणमात्मानं च विषयीकरोति। ~~अन्यथा [illegible]~~ २७

~~[illegible]~~। अत एव सर्वमेव ज्ञानं घटमहं जानामीत्याकारकं। इत्थं च ज्ञानस्य मितिमात्रमेव विषयत्वा
त् त्रिपुटीप्रत्यक्षतेत्याहुः। तन्न। चक्षुर्जन्यघटज्ञानादिना स्वात्मनो विषयीकर्तुमशक्यत्वात्। चाक्षुषादिज्ञाने वि
५२ षयसन्निकर्षस्यापेक्षितत्वात्। न चोत्पद्यमानं पूर्वमस्ति सन्निकृष्टं वा। कथं वा चक्षुषा स्वविषयकं ज्ञानं जन्यते।
चाक्षुषादिज्ञाने महदुद्भूतरूपवद्द्रव्यस्य योग्यत्वात्। अन्यथाकाशस्यापि चक्षुषा ग्रहापत्तेः। भट्टास्तु। ज्ञानं तावत्
स्वविषये ज्ञाततारूपं फलं जनयतीति निरूढं। तयैवानुमेयं ज्ञानमित्याहुः। तदपि न। ज्ञाततायानिरस्तत्वात्। ज्ञा
नरूपस्य साध्यस्याप्रसिद्धौ अनुमानासंभवाच्च। उच्यते। मनसैव ज्ञानं गृह्यते। योग्यत्वात्। न चैवं तद्ज्ञा
नमपि स्यात् एवं तज्ज्ञानमपीत्यनवस्था। विषयांतरसंचारसामग्र्याः प्रतिबंधेन कस्यचिज्ज्ञानस्य मनसाऽग्र तू
हात्। तत्प्रतिबंधकत्वे किं मानमिति चेत्। फलानुदय एवेति संक्षेपः। तथापि तस्य प्रामाण्यं केन गृह्यते न तदनु
मानेन ग्रहीतुं शक्यं। स्व साध्याप्रसिद्धेः। अत्र भट्टाः। ज्ञाततया ज्ञानानुमितिर्जायमाना प्रामाण्यमपि विषयीकरो
तीत्याहुः। तन्न। ज्ञाततायां हि ज्ञानमात्रस्य व्याप्तिर्गृहीता। प्रमात्वविशिष्टस्य वा। नाद्यः। ततो ज्ञानमात्रं सि
ध्येत्। न तु तत्प्रामाण्यमपि। साध्यतावच्छेदकरूपेण साध्यं व्याप्यसिध्येत्। न तु रूपांतरेण। अन्यथा वह्निव्याप्य
धूमवानिति ज्ञानात् द्रव्यत्वेन दीपत्वेन वा दहनसिध्यापत्तेः। नांत्यः। व्यभिचारात् साध्याप्रसिद्धेश्च। उ

एवस्तु। स्वप्रकाशमहिम्ना स्वमिव स्वप्रामाण्यमपि सिध्यतीत्याहुः। तन्न। स्वप्रकाशताया असिद्धेः।
किं चैवं ज्ञाने प्रामाण्यसंशयो न स्यात्। ज्ञानग्रहे प्रामाण्यनिश्चयात्। निश्चिते संशयायोगात्। अ
ग्रहे स्वप्रकाशताया व्याघातात्। धर्मिज्ञानाभावाच्च। समानधर्मवत्तया धर्मिज्ञानस्यान्वयव्य
तिरेकाभ्यां संशयहेतुत्वावधारणाच्च। मुरारिमिश्रास्तु। तद्विशेष्यकत्वे सति तत्प्रकारकत्वं ← द्व
प्रामाण्यं। तच्च प्रथमानुव्यवसायेनैव गृह्यते। तथाहि। घटत्ववांस्तावद्व्यवसायेनोपनीतः
अतस्तद्विशेष्यकता संसर्गरूपा ज्ञाने मनसा गृह्यते। विशेषणस्य तद्गतः पूर्वमुपस्थितत्वात्।
न च मनसो बहिरर्थप्रकाशासामर्थ्यं। उपनयसहकारेण तस्य बहिरर्थप्रकाशकत्वात्। क
थमन्यथा कविकाव्यमूलभूतं ज्ञानं। कथं वानुव्यवसाये विषयभानं। घटत्वमपि व्यवसा
येनैवोपनीतं। अतस्तत्प्रकारता विषये तावत्सुग्रहेति उभयस्यैव ग्रहे गृहीतं प्रामाण्यमि
ति। तदपि न। एवं हि तद्विशेष्यकत्वे तत्प्रकारकत्वे च गृहीते। न च तावदेव प्रामाण्यं। किंतु त
द्विशेष्यकत्वविशिष्टं तत्प्रकारकत्वं च। न च तद्विशेष्यकत्ववैशिष्ट्यमनुव्यवसायो ग्रही श्री:
तुमर्हति। तद्विशेष्यकस्य पूर्वमनुपस्थितेः। संसर्गविधया हि विशेष्यता प्रकारताच २८

र्य

भासते॥ किंचैतदपि न प्रामाण्यं। वह्नित्वं प्रमेयोर्गुणावग्रहीति भ्रमेऽतिव्याप्तिः। अस्ति हि तत्र वह्निविशेष्य
कत्वं। वह्निप्रकारकत्वं च। किंतु तद्वद्विशेष्यकत्वावच्छेदेन तत्प्रकारकत्वमित्युक्तं। न चावच्छेदाव
च्छेदकभावः प्रथमं ग्रहीतुं शक्यः। तद्वद्विशेष्यकत्वस्य स्वरूपमप्रतीतेः। अत्रोच्यते। मास्तां प्रथमा
नुव्यवसायेन प्रामाण्यग्रहो द्वितीयेन तु स्यात्। तद्वद्विशेष्यकत्वस्य स्वरूपं प्रथमानुव्यवसायेनोपस्थितेः। न चैवं प्र
माण्यस्यानुव्यवसायगम्यत्वे प्रामाण्यसंशयो न स्यादिति वाच्यं। दोषवशाद्यत्र प्रामाण्यं नानुव्यवसा
येन गृहीतं तत्र संशयसंभवात्। अन्यथा पुरुषत्वे संशयोपि न स्यात्। तस्य चक्षुर्वेद्यत्वात्। न चैवं प्रा
माण्ये स्वतो ग्राह्यत्वमागतं। असति प्रतिबंधके यावत्स्वाश्रयानुव्यवसायग्राह्यत्वं हि मिश्रमते स्व
तो ग्राह्यत्वं। तच्च न। प्रथमानुव्यवसायेनाग्रहात्। एवं च साध्यप्रसिद्धावनुमानमपि तद्ग्राहकं। न च प
त्व ४ था। इदं पुरुषज्ञानं प्रमा। करादिमति पुरुषज्ञानत्वात्। संप्रतिपन्नवत्। पक्षापन्नैवं तन्नैवं। यथा
पटइति व्यतिरेकी। अन्ये तु प्रथमं प्रामाण्याभाववत्त्व प्रामाण्यं व्यतिरेकिणा साध्यं। न च साध्याप्र
सिद्धिः। न हि व्यतिरेकिणा साध्यहेत्वोर्व्याप्तिर्गृह्यते। किंतु साध्याभावहेत्वभावयोरिति किं तदप्रसिद्ध्या।
न च साध्या[redacted]प्रसिद्धौ तदभावाप्रसिद्धिः। प्रतियोगिज्ञानसाध्यत्वादभावज्ञानस्येति वाच्यं। तस्य

मं० प्रतियोगिरूपत्वात्। न च प्रतियोगिज्ञानेपि अभावज्ञानं कारणं। एवं च यद्व्यापकतया हेत्वभावो गृहीतः
२९६ तेन हेतुना तदभावः सिध्यतीति। न च साध्याज्ञाने कथं तद्विशिष्टज्ञानरूपानुमितिः। अप्रामाण्याभाववि
२१ शेष्यकायाएवानुमितेरभ्युपगमादित्याहुः। अस्त्वां तत्। तथापि तद्वति तत्प्रकारकत्वग्रहे तुल्यैव गतिः। किं
च करादिमति पुरुषत्वज्ञानत्वं केन ग्राह्यं। अनुव्यवसायेनेति चेत्तर्हि पुरुषत्ववति तत्प्रकारकत्वग्र
हः केन वार्यतां। यतस्तमपहाय एषकुसृष्ट्यादर इति। अन्ये तु। [illegible]तत्प्रकारकज्ञानत्वमेव प्रामाण्यं
। न च रजतत्वप्रकारकशुक्तिज्ञानस्यापि प्रामाण्यं स्यात्। तदसिद्धेः। न हि यत्र यन्नास्ति तत्र तत्प्रका
रकज्ञाने मानमस्ति। कथं तर्हि शुक्ताविदं रजतमिति व्यवहार इति चेत्। नत्र व्यवहर्तव्ये रजत
त्वासंसर्गाग्रहात्। रजतत्वप्रकारिकायां शुक्तौ प्रवृत्तिरपि तत्रेष्टतावच्छेदकरजतत्वस्यासंसर्गा
ग्रहात्। अथ रजतत्वप्रकारकप्रवृत्तौ रजतत्वप्रकारकज्ञानस्य प्रमास्थले क्लृप्तं। तथा च तेन कारणत्वं
विना शुक्तौ कथं प्रवृत्तिः स्यादिति चेन्न। तत्रापि रजतत्वासंसर्गाग्रहस्य हेतुत्वात्। अथासंस श्रीः
र्गाग्रहस्याविशेषात् कचित्संवादिनी कचिद्विसंवादिनीति कुतो नियम इति चेत्। तद्वति २९६

तदसंसर्गाग्रहस्य तत्प्रकारकसंवादिन्यां तदभाववति तदसंसर्गाग्रहस्य तत्प्रकारकविसं
३० वादिन्यां प्रवृत्तौ हेतुत्वात्। अत्रोच्यते। लाघवात् रजतत्वसंसर्गग्रहो रजतत्वप्रकारकप्रवृत्तौ हे
तुः। न तु रजतत्वासंसर्गाग्रहो गौरवात्। न च शुक्तौ तदसंभवः। विशेषणज्ञानं विशेष्येंद्रियसं
हि४ निकर्षस्तयोरसंसर्गाग्रह इत्येवं विशिष्टज्ञाने हेतुः। अस्ति चात्रापि विशेषणस्य रजतत्व
३० स्य ज्ञानं विशेष्यशुक्तींद्रियसंनिकर्षस्तयोरसंसर्गाग्रहश्च। अथ रजतत्वेंद्रियसंनिकर्ष
विरहात् कथं तत्प्रकारकं प्रत्यक्षमिति चेत्। संनिहितं यत्र रजतं तत्र संयुक्तसमवायस्या
न्यत्र ज्ञानस्य संनिकर्षस्य सत्वात्। ज्ञानस्य संनिकर्षत्वे किं मानमिति चेत्। रज
तत्वप्रकारकं प्रत्यक्षमित्येव हि। तत्रैव किं मानमिति चेत्। तत्प्रकारिकाप्रवृत्तिरि श्रीः
ति संक्षेपः।। इति श्रीचूडामणिकृतसिद्धांतमंजरी समाप्तिमगमत्।। श्रीरस्तु।।

३०

न्यायमञ्जरी

६००